नं० ५५३४-ध (तन्त्रम्)

कामधेनु तंत्रम्‌ नं० १०६

पत्राणि २५

नं कालमालिनी तन्त्रम् पत्राणि २३ (सम्पूर्णम्)

४८

(क) कामधेनुतन्त्रम्
पत्राणि २५
(ख) कंकालमालिनी तन्त्रम्
पत्राणि २३

(तन्त्रम्)
(सम्पूर्णम्)

कामधेनुतंत्र

काम. धे. तं. १

ॐ नमः परदेवतायै श्रीपार्वत्युवाच देवदेव महादेव सर्वा
गमविशारद अधुना देवदेवेश पंचाशद्वर्णसंज्ञकं तत्त्वं हृ
द्यं महादेव कथयस्व दयानिधे कृपया कथयेशान यद्यहं
तव वल्लभा श्रीमहादेव उवाच अधुना संप्रवक्ष्यामि रहस्यम
तिगोपनं येन विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः अज्ञात्वा
मेत्रतत्त्वानि महाविद्यां जपेत्तु यः सर्वं तस्य वृथा देवि किं त
स्य जपपूजनैः ध्यानावधारणैश्चैव तथा योगसमाधिना व
र्णज्ञानं यदा नास्ति किं तस्य जपपूजनं मम कण्ठे स्थितं बीजं
पंचाशद्वर्णमद्भुतं नानावर्णयुतं शुद्धं तेजोरूपं सारसंज्ञकम्
पंचाशन्मातृकां देवी नानाविद्यामयी सदा नानाविद्यामयी
देवी नानाविद्यामयी सदा सर्ववर्णमयी देवी सर्वदेवमयी
परा सर्वदेवमयी सोमा ब्रह्माण्डजननी परा शृणुष्व कथया
भक्त्या निगदामि शृणु प्रिये अकारादिक्षकारान्ता मातृका
बीजरूपिणी विसर्गश्चैव बिन्दुश्च त्रिशक्तिर्ब्रह्मविग्रहः व
र्णाज्जायते ब्रह्मा तथा विष्णुः प्रजायते रुद्रश्च जायते देवि
जगत्संहारकारकः मम कण्ठस्थिता या सा शारदा वामलोच
ना तस्या गर्भस्थिता देवि बीजानि विविधानि च विश्वात्मकं
तु देशेन शिवोहं कमलानने शृणु तत्त्वं प्रकारस्य अतिगोप्यं

वराननेशारदेंदुप्रतीकाशंपंचकोणमयंसदा पंचदेव
मयंवर्णंशक्तित्रयसमन्वितं निर्गुणंत्रिगुणोपेतंस्वयं
कैवल्यमूर्तिमान् बिंदुतत्वमयंवर्णंस्वयंप्रकृतिरूपिणी
॥ १ ॥ इतिकामधेनुतंत्रेदेवदेवीसंवादेप्रथमःपटलः १
श्रीमहादेवउवाच आकारंपरमाश्चर्यंशंखज्योतिर्मयं
प्रिये ब्रह्मविष्णुमयंवर्णंतथारुद्रःस्वयंप्रिये पंचप्राण
मयंवर्णंस्वयंपरमकुंडली ॥ २ ॥ इकारंपरमानंदसुगं
धकुसुमच्छविं हरिब्रह्ममयंवर्णंसदारुद्रयुतंप्रिये स
दाशक्तिमयंदेवि गुरुब्रह्मस्वयंतथा सदाशिवमयंवर्णं
परंब्रह्मसमन्वितं हरिब्रह्मात्मकंवर्णंगुणत्रयसम
न्वितं इकारंपरमेशानिमूर्तिवैकुंडलीस्वयं ॥ ३ ॥ ईकारं
परमेशानिस्वयंपरमकुंडली ब्रह्मविष्णुमयंवर्णंतथा
रुद्रमयंसदा पंचदेवमयंवर्णंपीतविद्युल्लताकृतिं च
तुर्ज्ञानमयंवर्णंपंचप्राणमयंसदा ॥ ४ ॥ उकारंपरमेशा
निनाटःकुंडलिनीस्वयं पीतचंपकसंकाशंपंचदेवमयं
सदा पंचप्राणमयंदेवि चतुर्वर्गप्रदायकं ॥ ५ ॥ ऊकारं
देवदेवेशि बीजंपरमडलीमं शंखकुंदसमाकारंस्वयं
परमकुंडली पंचप्राणमयंवर्णंपंचदेवमयंसदा पंच

प्राणयुतं वर्णं तथा त्रयगुणात्मकं विंदुत्रययुतं वर्णं पीत
विद्युल्लता तथा धर्मार्थकाममोक्षं च सदा सुखप्रदायकं
। ऊ । ६ ऋकारं परमेशानि कुंडली मूर्तिमान्स्वयं अत्र ब्र
ह्मा च विष्णुश्च रुद्रश्चैव वरानने सदाशिवयुतं वर्णं सदाई
श्वरसंयुतं पंचप्राणमयं वर्णं चतुर्ज्ञानमयं सदा रक्तविद्
युल्लताकारं ऋकारं प्रणमाम्यहं ऋ ७ । ॠकारं परमेशा
नि स्वयं परमकुंडली पीतविद्युल्लताकारं पंचदेवमयं सदा
चतुर्ज्ञानमयं वर्णं पंचप्राणमयं सदा त्रिशक्तिसहितं व
र्णं प्रणमामि सदा प्रिये ॠ । ८ । लृकारं चंचलापांगि कुं
डली परदेवता तत्र ब्रह्मादयः सर्वे तिष्ठंति सततं प्रिये
पंचदेवमयं वर्णं चतुर्ज्ञानमयं सदा पंचप्राणयुतं वर्णं
तथा गुणत्रयात्मकं विंदुत्रयात्मकं वर्णं पीतविद्युल्लता
तथा लृ ९ ॡकारं परमेशानि पूर्णचंद्रसमप्रभं पंचदेवा
त्मकं वर्णं पंचप्राणात्मकं सदा गुणत्रयात्मकं वर्णं तथा
विंदुत्रयात्मकं चतुर्वर्गप्रदं देवि स्वयं परमकुंडली ॡ १०
एकारं परमेशि ब्रह्मविष्णुशिवात्मकं वंधूककुसुमप्र
तं पंचदेवमयं सदा पंचप्राणात्मकं वर्णं तथा विंदुत्रया
त्मकं चतुर्वर्गप्रदं देवि स्वयं परमकुंडली ए ॥ इति।

श्रीकामधेनुतंत्रे देवदेवीसंवादे द्वितीयः पटलः २ ऐकारं प
रमं दिव्यं महाकुंडलिनी स्वयं कोटिचंद्रप्रतीकाशं पंचप्राण
मयं सदा ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं प्रिये सदाशिव
मयं वर्णं बिंदुत्रयसमन्वितं ऐ १२ ओकारं चंचलापांगि पंच
देवमयं सदा रक्तविद्युल्लताकारं त्रिगुणात्मानमीश्वरं पंचप्रा
णमयं वर्णं नमामि देवमातरं एतद्वर्णं महेशानि स्वयं परम
कुंडली ओ १३ रक्तविद्युल्लताकारं औकारं कुंडली स्वयं ब्र
ह्मादयः सर्वे तिष्ठंति सततं प्रिये पंचप्राणमयं वर्णं सदा
शिवमयं सदा सदा ईश्वरसंयुक्तं चतुर्वर्गप्रदायकं औ १४
अंकारं बिंदुसंयुक्तं पीतविद्युत्समप्रभं पंचप्राणात्मकं वर्णं
ब्रह्मादिदेवतामयं सर्वज्ञानमयं वर्णं बिंदुत्रयसमन्वितं
शक्तित्रयमयं वर्णं स्वयं परमकुंडली अं १५ अःकारं पर
मेशानि विसर्गसहितं सदा अःकारं परमेशानि रक्तविद्युत्प्र
भामयं पंचदेवमयो वर्णः पंचप्राणमयः सदा सर्वज्ञानम
यो वर्णः पंचप्राणमयः सदा आत्मादितत्वसंयुक्तः बिंदुत्र
यमयो वर्णः शक्तित्रयमयः सदा किशोरवयसाः सर्वे गीत
वाद्यादितत्पराः शिवस्य युवती एता मूर्तिमत्कुंडली स्वयं अः १९
अधुना संप्रवक्ष्यामि ककारं तत्वमुत्तमं रहस्यं परमाश्चर्यं त्रैलो

काम
ये.
तं.
३

3

वर्णानां च संशृणु वामरेखा भवेद्ब्रह्मा विष्णुर्दक्षिणवीथिका अ
घोरेखा भवेद्रुद्रो मात्रा साक्षान्महेश्वरी कुंडलीग्रंथिरूपाकारा।
मध्ये शून्यः सदाशिवः जवायावकसंकाशा वामरेखा वरान
ने शरच्चंद्रप्रतीकाशा दक्षरेखा च मूर्तिमान् अघोरेखा वरारो
हे महामारकतद्युतिः शंखकुंदसमा कीर्तिर्मात्रा साक्षात्सर
स्वती कुंडलीग्रंथिरूपा या तु कोटिविद्युल्लताकृतिः कोटिचंद्र
प्रतीकाशा मध्ये शून्यं सदाशिवः शून्यगर्भे स्थिता काली कैव
ल्यपददायिनी ककाराज्जायते सर्वं कामं कैवल्यमेव च अ
र्थश्च जायते देवि तथा धर्मश्च नान्यथा ककारः सर्ववर्णानां मू
लप्रकृतिरेव च ककारः कामदा कामरूपिणी स्फुरदव्यया
कामिनी या महेशानि स्वयं प्रकृतिसुंदरी माता सा सर्वदेवा
नां कैवल्यपददायिनी ऊर्ध्वकोणे स्थिता कामा ब्रह्मशक्तिरि
तीरिता वामकोणे स्थिता ज्येष्ठा विष्णुशक्तिरितीरिता दक्षको।
णे स्थिता विंदुरौद्री संहाररूपिणी ज्ञानार्थ्या सा तु चार्वंगि केन
वत्रयात्मिका इच्छाशक्तिर्भवेद्ब्रह्मा विष्णुर्ज्ञानमान् क्रि
याशक्तिर्भवेद्रुद्रः सर्वः प्रकृतिमूर्तिमान् आत्मविद्याशिवैस्त
त्तैः सदासार्धत्रिमिश्रितैः आसनं त्रिपुरादेव्याः ककारं पंचदेवतं।
ईश्वरो यत्र देवेशि त्रिकोणान्तस्समं स्थितः त्रिकोणमेतत्कथितं

योनिमंडलमुत्तमं केवलं प्रपठेद्यस्तुः कामिनीसाधकीर्तिता
शयनागारसिंहासनस्थोकामिनींपरां चतुर्भुजांत्रिनेत्रांचवा
हुवल्लीविराजितां कदंबकोरकाकारस्तनद्वयविभूषितां
रत्नकेयूरांगदैश्चभूषणैरूपशोभितां रत्नहारैःमुक्ताहारैःशो
भितांपरमेश्वरी एवंहिकामिनींध्यात्वाककारंदशधाजपेत्
प्रफुल्लवदनोध्यात्वाजपस्यफलभाग्भवेत् एतत्तेकथितंदे
विककारतत्वमुत्तमं इतिश्रीकामधेनुतंत्रेदेवदेवीसंवादे।
तृतीयःपटलः ३ श्रीमहादेवउवाच ककारंपरमेशानिकुं
डलीत्रयसंयुतं क १ एकारंपरमाश्चर्यंशंखकुंदसमप्रभं
कोणत्रयसंयुतंस्थूलंविंदुत्रयसमन्वितं गुणत्रययुतंदेविपंचदे
वमयंसदा त्रिशक्तिसंयुतंवर्णंएकारंप्रणमाम्यहं ए २ ग।
कारंपरमेशानिपंचदेवात्मकंसदा निर्गुणंत्रिगुणोपेतंनिरी
हंनिर्मलंसदा पंचप्राणमयंवर्णंसर्वशक्त्यात्मकंप्रिये अरु
णादित्यसंकाशंकुंडलींप्रणमाम्यहं ग ३ चकारंचंचलापां
गीवन्हिकोणात्मकंसदा पंचदेवमयंवर्णंअरुणादित्यसन्नि
भं निर्गुणंत्रिगुणोपेतंसदात्रिगुणसंयुतं सर्वांगंसर्वदंशांतंय
कारंप्रणमाम्यहं ह ४ ई.कारंपरमेशानीस्वयंपरमकुंडली
सर्वदेवमयंवर्णंत्रिगुणंलोललोचनं पंचप्राणमयंवर्णंड.

काम. धे. तं. ५

कारं प्रणमाम्यहं ङ. ५ चवर्णं शृणु सुश्रोणि चतुर्वर्गप्रदाय
कं कुंडलीसहितं देवि स्वयं परमकुंडली सततं कुंडलीयुक्तं पं
देवमयं सदा पंचप्राणमयं वर्णं पंचप्राणात्मकं सदा त्रिशक्ति
सहितं वर्णं त्रिविंदुसहितं प्रिये च ६ छकारं परमाश्चर्यं स्वयं
परमकुंडली सततं कुंडलीयुक्तं पंचदेवमयं सदा पंचप्राणम
यं वर्णं त्रिशक्तिसहितं सदा त्रिविंदुसहितं वर्णं सदा ईश्वरसंयु
तं पीतविद्युल्लताकारं छकारं प्रणमाम्यहं छ ७ जकारं परमे
शानि या स्वयं मध्यकुंडली शरच्चंद्रप्रतीकाशं सदा त्रिगुणसंयु
तं पंचदेवमयं वर्णं पंचप्राणमयं सदा त्रिशक्तिसहितं वर्णं
त्रिविंदुसहितं प्रिये ज ८ झकारं परमेशानि कुंडली मोक्षरूपि
णी रक्तविद्युल्लताकारं सदा त्रिगुणसंयुतं पंचदेवमयं वर्णं
पंचप्राणात्मकं सदा त्रिविंदुसहितं वर्णं त्रिशक्तिसहितं सदा
झ ९ सदा ईश्वरसंयुक्तं ञकारं शृणु सुंदरि रक्तविद्युल्लताकारं
स्वयं परमकुंडली पंचदेवमयं वर्णं पंचप्राणमयं सदा त्रिश
क्तिसहितं वर्णं त्रिविंदुसहितं सदा ञ १० टकारं चंचलापांगि स्व
यं परमकुंडली कोटिविद्युल्लताकारं पंचदेवमयं सदा पंचप्रा
णयुतं वर्णं गुणत्रयसमन्वितं त्रिशक्तिसहितं वर्णं त्रिविंदुसहि
तं सदा ट ११ ठकारं चंचलापांगि कुंडली मोक्षरूपिणी पीतवि

द्युल्लताकारं सदा त्रिगुणसंयुतं पंचप्राणात्मकं वर्णं पंचप्रा
णमयं सदा त्रिबिंदुसहितं वर्णं त्रिशक्तिसहितं सदा ठ १२
डकारं चंचलापांगि सदा त्रिगुणसंयुतं पंचदेवमयं वर्णं पं
चप्राणमयं सदा त्रिशक्तिसहितं वर्णं त्रिबिंदुसहितं सदा च
तुर्ज्ञानमयं वर्णं आत्मादितत्त्वसंयुतं पीतविद्युल्लताकारं
डकारं प्रणमाम्यहं ड १३ ढकारं परमाराध्यं यास्वयं कुंड
लीपरा पंचदेवात्मकं वर्णं पंचप्राणमयं सदा सदा त्रिगु
णसंयुक्तं आत्मादितत्त्वसंयुतं रक्तविद्युल्लताकारं ढकारं
प्रणमाम्यहं ढ १४ णकारं परमेशानि स्वयं परमकुंडली
पीतविद्युल्लताकारं पंचदेवमयं सदा पंचप्राणमयं देवि
सदा त्रिगुणसंयुतं आत्मादितत्त्वसंयुक्तं महामोक्षप्रदायकं
ण १५ इति श्रीकामधेनुतंत्रे देवदेवीसंवादे चतुर्थः पटलः ५
श्रीमहादेव उवाच तकारं चंचलापांगि स्वयं परमकुंडली
पंचदेवात्मकं वर्णं पंचप्राणमयं तथा त्रिशक्तिसहितं वर्णं
आत्मादितत्त्वसंयुतं त्रिबिंदुसहितं वर्णं पीतविद्युत्समप्र
भं त १६ थकारं चंचलापांगि कुंडली मोक्षरूपिणी त्रिश
क्तिसहितं वर्णं त्रिबिंदुसहितं सदा पंचदेवमयं वर्णं पंच।
प्राणात्मकं सदा अरुणादित्यसंकाशं थकारं प्रणमाम्यहं थ १०

काम· ये· ५ दकारं शृणु चार्वंगि चतुर्वर्गप्रदायकं पंचदेवमयं वर्णं पंच
प्राणमयं सदा त्रिशक्तिसहितं देवि त्रिशक्तिसहितं सदा आ
त्मादितत्त्वसंयुक्तं स्वयं परमकुंडली रक्तविद्युल्लताकारं द। गुं
कारं हृदि भावय द १८ धकारं परमेशानि कुंडली मोक्षरूपि
णी आत्मादितत्त्वसंयुक्तं पंचदेवमयं सदा पंचप्राणमयं दे
वि त्रिशक्तिसहितं सदा त्रिबिंदुसहितं वर्णं धकारं हृदि भाव
य पीतविद्युल्लताकारं चतुर्वर्गप्रदायकं ध १९ नकारं शृ
णु चार्वंगि रक्तविद्युल्लताकृतिं पंचदेवमयं वर्णं स्वयं परम
कुंडली पंचप्राणात्मकं वर्णं हृदि भावय पार्वति न २० अतः
परं प्रवक्ष्यामि पकारं मोक्षदायकं चतुर्वर्गप्रदं वर्णं शरच्चंद्र
समप्रभं पंचदेवमयं वर्णं स्वयं परमकुंडली पंचप्राणमयं व
र्णं त्रिशक्तिसहितं सदा त्रिगुणारहितं वर्णं आत्मादितत्त्वसं।
युतं महामोक्षप्रदं वर्णं हृदि भावय पार्वति प २१ फकारं शृ
णु चार्वंगि रक्तविद्युल्लतोपरं चतुर्वर्गप्रदं वर्णं पंचदेवमयं
सदा पंचप्राणमयं वर्णं सदा त्रिगुणसंयुतं आत्मादितत्त्वसं
युक्तं त्रिबिंदुसहितं सदा फ २२ बकारं शृणु चार्वंगि चतुर्वर्ग
प्रदायकं शरच्चंद्रप्रतीकाशं पंचदेवमयं सदा पंचप्राणात्म
कं वर्णं त्रिबिंदुसहितं सदा त्रिशक्तिसहितं वर्णं सदा वाभुत

निर्मितं स्वयंकुंडलिनी साक्षात्सततं प्रणमाम्यहं व २३ मका
रं शृणु चार्वंगि स्वयं परमकुंडली महामोक्षप्रदं वर्णं अरुणा
दित्यसन्निभं पंचप्राणमयं वर्णं पंचदेवमयं सदा त्रिशक्तिसहि
तं वर्णं त्रिबिंदुसहितं प्रिये भ २४ मकारं शृणु चार्वंगि स्वयं प
रमकुंडली अरुणादित्यसंकाशं चतुर्वर्गप्रदायकं त्रिशक्ति
सहितं वर्णं त्रिबिंदुसहितं सदा आत्मादितत्त्वसंयुक्तं हरिस्थं
प्रणमाम्यहं म २५ यकारं शृणु चार्वंगि चतुष्कोणमयं सदा
पलालधूमसंकाशं स्वयं परमकुंडली पंचप्राणमयं वर्णं पंच
देवमयं सदा त्रिशक्तिसहितं वर्णं त्रिबिंदुसहितं तथा प्रणमा
मि सदा वर्णं मूर्तिमान्मोक्षमव्ययं य २६ इति श्रीकामधेनुतंत्रे
देवदेवीसंवादे पंचमः पटलः ५ श्रीमहादेव उवाच रकारं
चंचलापांगि कुंडलीहृदयसंयुतं रक्तविद्युल्लताकारं पंचदेवा
त्मकं सदा पंचप्राणमयं वर्णं त्रिबिंदुसहितं सदा त्रिशक्तिसा
हितं देवि आत्मादितत्त्वसंयुतं सर्वतेजोमयं वर्णं सततं प्रण
माम्यहं र २७ लकारं चंचलापांगि कुंडलीत्रयसंयुतं पीतवि
द्युल्लताकारं सर्वरत्नप्रदायकं पंचदेवमयं वर्णं पंचप्राणात्म
कं सदा त्रिशक्तिसहितं वर्णं त्रिबिंदुसहितं हि सा आत्मादित
त्त्वसहितं हरिं भावय सर्वदा ल २८ वकारं चंचलापांगि कुं

काम
धे.
तं.
६

डलीमोत्तमत्रयं पंचप्राणमयं वर्णं त्रिशक्तिसहितं सदा त्रिविं
दुसहितं वर्णं आत्मादितत्त्वसंयुतं पंचदेवमयं वर्णं पीतविद्यु
ल्लतोपमं चतुर्वर्गमयं वर्णं सर्वसिद्धिप्रदायकं त्रिशक्तिसहि
तं देवि त्रिशक्तिसहितं सदा ब २९ णकारं परमेशानि स्वर्णव
र्णं शुचिस्मिते रक्तवर्णप्रभाकारां स्वयं परमकुंडली चतुर्वर्ग
प्रदां देवि णकारं ब्रह्मविग्रहं पंचदेवमयं वर्णं पंचप्राणात्मकं
प्रिये रजःसत्त्वतमोयुक्तं त्रिविंदुसहितं सदा त्रिशक्तिसहितं।
वर्णं आत्मादितत्त्वसंयुतं ण ३० षकारं शृणु चार्वंगि कोणाव
हृमयं सदा रक्तचंद्रप्रतीकाशं स्वयं परमकुंडली चतुर्वर्गप्र
दं वर्णं सर्वथा निर्मितविग्रहं पंचदेवमयं वर्णं पंचप्राणमयं स
दा रजःसत्त्वतमोयुक्तं त्रिविंदुसहितं परं सर्वदेवमयं वर्णं हृ
दि भावय पार्वति ष ३१ सकारं शृणु चार्वंगि शक्तिबीजं परात्प
रं कोटिविद्युल्लताकारं कुंडलीत्रयसंयुतं पंचदेवमयं देवि पं
चप्राणमयं सदा रजःसत्त्वतमोयुक्तं त्रिविंदुसहितं सदा त्रिश
क्तिसहितं वर्णं आत्मादितत्त्वसंयुतं प्रणम्य सततं देवि हृदि।
भावय सुंदरि स ३२ हकारं शृणु चार्वंगि चतुर्वर्गप्रदायकं कुं
डलीत्रयसंयुक्तं रक्तविद्युल्लतोपमं रजःसत्त्वतमोयुक्तं पंचदेव
मयं सदा पंचप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा त्रिविंदु।

6

सहितं वर्णं हृदि भावय सुन्दरि ॥ ११ ॥ तकारं शृणु चार्वङ्गि
कुण्डलीत्रयसंयुतं चतुर्वर्गमयं वर्णं पञ्चदेवमयं सदा पञ्चप्रा
णात्मकं वर्णं त्रिशक्तिसहितं सदा त्रिबिन्दुसहितं वर्णं आत्मा
दितत्त्वसंयुतं शरच्चन्द्रप्रतीकाशं हृदि भावय सुन्दरि ॥ १४ ॥ अ
कारादितकारान्तं स्वयं परमकुण्डली सर्ववर्णावर्णविषये वर्णा
त्सञ्जायते ध्रुवं नानाशास्त्रपुराणानि इतिहासं च सुन्दरि वेदं च
स्मृतिशास्त्रं च यन्त्राणि यानि कानि च अक्षराज्जायते सर्वं पञ्च
तत्त्वं प्रिये ॥ इति श्रीकामधेनुतन्त्रे देवदेवीसंवादे षष्ठः पटलः ॥
श्रीमहादेव उवाच रहस्यं परमाश्चर्यं सदा मम हृदि स्थितं अ
तः परं प्रवक्ष्यामि मन्त्रतत्त्वं पृथक् पृथक् मातृकायां वरारोहे ।
सावधानावधारय अतः परं जपेन्मन्त्रं पञ्चाशन्मातृकां पृथक्
अतस्त्वमविकारी स्याज्ज्ञात्वा कार्यविचारणा इति ते कथितं देवि
प्रयोगं मन्त्रमुत्तमं एतन्मन्त्रं विना देवि इष्टमन्त्रं जपेन्नरः सर्वं तस्य
भवेद्व्यर्थं सर्वं व्यर्थं कदर्शने एतन्मन्त्रं प्रथमतो दशधा प्रजपेत्प्रि
ये ततस्तु प्रणवं दत्त्वा मातृकां प्रजपेत्पृथक् प्रयोगं परमाश्चर्यं
सावधानावधारय तद्यथा ॐ अं ॐ ॐ आं ॐ ॐ इं ॐ ॐ ईं ॐ ॐ उं ॐ
ॐ ऊं ॐ ॐ ऋं ॐ ॐ ॠं ॐ ॐ ऌं ॐ ॐ ॡं ॐ ॐ एं ॐ ॐ ऐं ॐ ॐ ओं ॐ ॐ औं
ॐ ॐ अं ॐ ॐ अः ॐ ॐ कं ॐ एवं क्षकारपर्यन्तं प्रणवैः पुटितं सदा

प्रत्येकमेवं चार्वंगि दशधा दशधा जपेत् प्रत्येकं जपमात्रेण प्रत्ये
कं ध्यानमाचरेत् अथवा सर्ववर्णानामेकीकृत्य वरानने प्रजपे
द्दशधा मंत्रं समंत्रं प्रजपेत्ततः तथा च सर्ववर्णानां ध्यानं वक्ष्यामि
संशृणु कोटिचंद्रप्रतीकाशां पुंडरीकोपरिस्थितां प्रमत्तभ्रमराली
लाभां नयनत्रयराजितां नानाशास्त्रप्रवक्त्रीं च विद्याभ्याससमंयोस
दा नानावाद्यमयीं देवीं श्वेतां शुक्लपरिच्छदां शुक्लाभरणदीप्तांगी
शुक्लवस्त्रानरिरिणीं ब्रह्मांडदर्पणे यस्या वामहस्तस्य पार्श्वेति त
दुकूलकशिशुप्रेत्सत्ददर्पणश्च ध्याते एवं ध्यात्वा जगद्धात्रीं मातृ
कां जगदंबिकां प्रजपेद्दशधा मंत्रमेकधा वा जपेत्त्वयः सर्वसि
द्धिमवाप्नोति नात्र कार्या विचारणा एषा ते कथिता विद्या मातृका
परमात्मिका यत्कृत्वा साधको याति इहलीभं मोत्तमव्ययं प्रत्येके
नाथवा देवि एकैकैव वरानने रहस्यं शृणु चार्वंगि सगोप्यं च व
नत्रये १६ विद्यास्कृतस्त्वा मननात्परमेश्वरि यस्य मंत्रस्य यद्ध्या
नं कृत्वा देवि प्रयत्नतः तन्मंत्रं दशधा जप्त्वा १६ ध्यानेन ततः प्रिये
१६ मंत्रं प्रजप्त्वा वै सर्वसिद्धिं ततो लभेत् अनेन विधिना देवि मंत्र
श्चेतन्यमाप्नुयात् चेतनारहितं मंत्रमेकधा न स्मरेत्त्वयः कोटि
पुरश्चरं याति ना त्वया वरवर्णिनि श्रीमहादेव उवाच अपरं शृणु।
चार्वंगि वर्गाष्टकमनुत्तमं वर्गाष्टकं विना देवि कोटिपुरश्चरं यदि

संर्वं तस्य वृथा देवि अंते च नरकं व्रजेत् अकचटतपयशाश्चै
व तदष्टवर्गकं मंत्रस्यादौ च अंते च अकारं बिंदुसंयुतं दत्वा नमे
व भक्त्या च अष्टोत्तरशतं जपेत् अनेन विधिना देवि आदित्याभि
समाचरेत् तावज्जपेद्वरारोहे यावल्लक्षं समाप्यते ततो मंत्रवरा
रोहे ध्रुवं जीवत्वमाप्नुयात् जीवत्वं हि विना देवि न पुरश्चरणं चरे
त् जीवत्वं हि विना देवि यदि कुर्यात्पुरश्चरं विफला तस्य सा सर्वा
सर्वं पुण्यं विनश्यति वर्गाष्टकेन सहितं शतमष्ट जपेद्ध्रुवं सदे
व सहस्रमध्ये सर्वं मंत्रं च सिध्यति किं तस्य ध्यानपूजायां पुरश्च।
र्यां च किं पुनः कृत्वा तु जीवं मंत्रस्य विधां च वरवर्णिनि विधाय्या
स्तथा देवि यः कुर्यात्प्राणनिर्णयं तत्प्राणं ददाति वां वेगि पुर
श्चर्याशतं स्मृतं विशेषतः कलियुगे जंबुद्वीपस्य भारते प्राणन्या
सं विना देवि न जपेत्साधकः क्वचित् वैष्णवे च मंत्रेषु शैवेषु शा
क्तिमंत्रेषु गाणेशसौरमंत्रे च प्राणन्यासं प्रशस्यते किं तस्य जपपू
जास्तहोमादिषु च किं प्रिये प्राणतत्त्वमहेशानि योजानात्तिसप्र
जेकाः प्राणन्यासं विना देवि देहन्यासं करोति यः स भ्रष्टः सर्वपा
पिष्ठो रौरवं नरकं व्रजेत् आलोकितन्तु वेदे विश्वये दर्शनमाचरे
त् इति श्रीकामधेनुतंत्रे देवदेवीसंवादे सप्तमः पटलः ७ श्रीम
हादेव उवाच पतत्ते कथितं भद्रे रहस्यं परमं तथा पतत् तंत्रोक्तं सर्वं

काम धे० तं० ८

तंत्रेषु मातृकायाः पृथक्पृथक् पंचाशद्वर्णसंकेतं पंचाशत्तत्त्वरू
पं सर्वदेवमयं तत्त्वं सर्वज्ञानमयं तथा सर्वशक्तिमयं तत्त्वं स।
र्वप्राणमयं तथा बिंदुतत्त्वमयं देवि ग्रहंतत्त्वमयं तथा गर्भतत्त्व
मयं देवि केवलं कलिका तथा ऊर्ध्वमस्य यदा देवि कलिकां ग
यसंयुतां अदृश्यं सर्वभूतानां तथा गंधयुक्विस्मिते पुष्पस्य क
लिकामध्ये यथा ज्योतिः प्रदीप्यते तथैव कलिकाबीजे नव तत्त्वं
च विद्यते कोटिविद्युत्प्रतीकाशं मातृकारूपमाम्यहं निराका
रां निर्गुणां च सगुणां तां गुणमातृका मता सा सर्वविद्यानां सर्वा
गमप्रतिष्ठिता सर्वासां वेदविद्यानां ब्रह्मांडानां च पार्वति सा
ना सा गीयते देवि पंचाशन्मातृका च सा मंत्रतंत्रं च विद्यां च सा।
र्ववर्णविनिर्मुक्तं पंचाशद्युवतीरूपा मातृका शब्दमध्यगा मातृ
का परमेशानि काली सा नात्र संशयः अतो ब्रह्मा अतो विष्णुः अ
तो रुद्रश्च ईश्वरः सदाशिवः अतो देवि ते सर्वे शववत्प्रिये शवव।
त्सर्वदेवं च ब्रह्मांडं शववत्सदा अत एव वरारोहे विष्णुमंत्रं यथा
तथा शिवमंत्रं यथा देवि गणेशमंत्रमेव च शक्तिमंत्रं च विद्या च
पंचाशद्युवतीमयं पुराणं च तथा वेदं स्मृतिशास्त्रं तथैव च एत
त्सर्वं वरारोहे युवतीरूपमद्भुतं ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदा।
शिवः सर्वे ते चैव बालापांगिमात्रकाजायते प्रिये समस्तजननीरे

8

बीमातृकाजननीपरा कदाचित्तलंसंयुक्तामहाशक्तिःप्रगी
यते मातृकावर्णरहितंब्रह्माण्डंशववत्प्रिये गीतंवाद्यश्रुतंना
संप्रालापंवरवर्णिनि सर्वाहिभुवनोद्भूपध्यानमार्गेप्रतिष्ठितं
एतत्तेकथितंदेविकालिकाबीजमुत्तमं उभयोःसंगमेदेविप्र
फलंभवतिप्रिये बहवःसंगमेदेविप्रफुल्लमोत्तमत्रयं यत्र
मंत्रेषुविद्यासुप्रफुलंभवतिध्रुवं प्रफुल्लंपुष्पवच्चार्वंगिजप
यत्तन्मनावेत् प्रफुल्लरहितंदेविविद्यामंत्रंयदिप्रिये केव
लंकालिकाबीजंवर्णैर्वर्णैःपृथक्पृथक् ध्यानासिद्धिमवा
प्नोतिनान्यथासुरपूजिते प्रफुल्लाकालिकाह्यपिकुल्लादी
नृजायतेध्रुवं भुवनीयासमाख्यातासामहाकुण्डलीपरा व
र्णरूपमयीदेवीकुण्डलीपरदेवता पंचाशद्वर्णतत्त्वंविवि।
द्यामंत्रंजपेत्तुयः सर्वंहिविफलंतस्यशववत्तज्जपंभवेत्
ज्ञात्वाप्रणम्यकुण्डलीतज्जपपूजादिकंप्रिये हरिर्हिनिर्गुणःसा
क्षात्सगुणापरकुण्डली तस्मात्तुभुवनीदेहात्न्हरेरुत्पत्तिरेव
च सर्वासांदेवदेवीनांबीजंजन्मस्थलंसदा बीजात्तुजायतेब्रह्मा
स्वरूपीसनातनः अतएवमहेशानिब्रह्मणःकारणंपरा
ज्ञात्वातत्रमिदंदेविजपपूजांकरोतियः प्राणन्यासविधिंकृत्वा
जपपूजांकरोतियः सशिवपरमब्रह्मस्वरूपपुरुषोत्तमः

काम धे. तं. ५

9

सएवदेवोवीरश्चसएवभैरवःस्वयं सएवपरमोदेविशिवेलो
केसदाशिवे सत्यंयोदेवि इत्यश्चसत्कुरुश्चनवामया उद्धर्तुं
चैवसंहर्तुंसमर्थःसोपिनामया श्रुत्वावातंत्रमेतन्नजपयंते
कविनियः सर्वंतस्यवृथादेवपशुरेवनसंशयः सर्वैश्चवग्
हर्देविशिष्योपिपशुवत्सदा श्रुत्वातस्यश्चखेविधांमंत्रवान
गनंदिनि सिद्धोभवतिचार्वंगि किंतस्यजपहजने एवंविधं
गुरुंमत्वाश्रुत्वापशुमुखात्प्रिये सर्वंमंत्रपरिसम्म रक्षीयाज्ञ
एनापरं सप्रष्टःसवपापिष्टःकथंमंत्रउपास्महे मंत्रस्यग
एनादेवियस्यापंश्रामयान्नरः तस्यापश्चणउचार्वंगिनरकेवा
नेरोत्रं यस्यापंश्रामयादेविस्वयंभुलिंगवालने तस्यापंको
टिगुणितंगणनादेवमंत्रयोः तस्मात्नगणनादेविवर्जयेन्म
तिमान्नरः सकाशेवैसवेन्नसौरेगाणपतौतथा श्रमन्त्स
वीस्तविधासगणनांवर्जयेन्नरः इतिश्रीकामधेनुतंत्रेदेवदे।
वीसंवादेसप्तमःपटलः ७ श्रीमहादेवउवाच अथनासं
प्रवक्ष्यामिरहस्यंगुह्यमुत्तमं यज्ञात्वासाधकोयातिदुर्लभंब्र
ह्ममंदिरं इडयापूरयेद्वायुंसुषुम्णागतगैततः रेचयेत्पिंग।
लामार्गेप्राणायामक्रमंप्रिये अनुलोमनवार्वंगिमातृकाघ्र
वंनीस्मरेत् पंचाशन्मातृकावर्णंसविंदुनादसंयुतं उच्चार्य

हरकेणैव ततः हंसमुच्चरेत् ततस्तु मातृकावर्णं विलोमे
न जपेत्प्रिये स्वसुम्नामध्यदेशेन त्रिवेणीस्थ वरानने अनुलो
मविलोमेन मातृकां प्रणवं नीत्स्मरेत् हंसमंत्रं ततो जप्त्वा विलो
मे ऋहयत्नतः अनेनैव विधानेन रेचये पिंगलापथे पंचहा
दशधा कृत्वा अत्र महेश्वरवर्णिनि त्रिसंध्यांचैव लोपांगि यः कु
र्यात्कमलानने जीवन्मासं भवेन्नस्यमंत्रसिद्धिस्त्वनामया प
कथावामहेशानि कलौ संख्याचतुर्गुणा प्रसह्य दशधा कृत्वा
शिवतुल्यो भवेन्नरः इति श्रीकामधेनुतंत्रे देवदेवीसंवादे
नवमः पटलः ९ श्रीमहादेव उवाच ललाटतत्त्वं वा वांगिरे
कारं सर्वदा प्रिये आकारं ज्ञवत्तं तत्त्वं भ्रूणे घ्नवरवर्णिनि इ
कारं दक्षनेत्रं च ईकारं वामनेत्रके उकारं दक्षकर्णे स्याहूकारं
वामकर्णके ऋकारं दक्षनासाच ॠकारं वामनासिके लृका
रं दक्षगंडे स्यात् लॄकारं वामगंडके एकारं अधरं तत्त्वं ऐकारं ओष्ठ
एव च ओकारं ऊर्ध्वदंतस्यात् औकारमधोदंतके अंकारं शिरस
स्तत्त्वं अः कारं मुखमंडले ककारादिपंचतत्त्वं दक्षवाहौ प्रशस्य
ते वामवाहौ चकारादिपंचतत्त्वं च निश्चितं दक्षपादे टकारादिपं
चतत्त्वं वरानने तकारादिपंचतत्त्वं वामपादे प्रशस्यते पकारं द
क्षपार्श्वे च फकारं वामपार्श्वके बकारं पृष्ठतत्त्वं च भकारं नाभिरे

च च मकारं उदरं तत्त्वं च यकारं हृदयं तथा धकारं स्कंदं तत्त्वं च ल
कारं वाममेव च ध्यानतत्त्वं चकारं च शकारं दक्षबाहुश्च वामबा
हौ षकारं च मकारं दक्षपादके वामपादं हकारं च लकारं शिर
सोपरि अकारं बीजतत्त्वं च नकारं प्राणमेव च मकारं च सका
रं च मंडितं हृतथैव च अहंकारः पकारः स्यात् फकारो मनस
स्तथा नकारं शब्दतत्त्वं च दं धं दृं धं प्रशस्यते गकारं पादतत्त्वं
च छकारं पायुमेव च उकारं आकाशतत्त्वं च ऊकारं श्रोत्रमेव
च तकारं च जकारः स्यात् ऋकारः पादमेव च ककारः पृथि
वीतत्त्वं खकारो घ्राणतत्त्वकं णकारं हस्तं डरीके घकारं तत्त्वं
सकारं च तथा चंद्रं रकारं वह्निमंडलं परमेष्ठिं तथा तत्त्वं षका
रः स्वरपूजिते लकारं पृथिवीतत्त्वं हकारं च शिरस्तथा यका
रं वायुतत्त्वं च लकारं स्वर्गमेव च एतद्योगमासाद्य तत्कारं त
४ त्त्वविग्रहं तेन अ त म स प फ न द ध ग छ उ ऊ ज ऋ क ख श
घ स र य ल ह क्ष अकारादिक्षान्तवर्णान्तत्त्वं च पंचविंशति स
र्वतत्त्वमतिग्रहं परमात्मा सलोचने मातृकाया वरारोहे क
मात्रा मात्रिसंस्थिता ब्रह्माणी चेंडिका रौद्री गौरी इन्द्राणी तथैव च
कौमारी वैष्णवी दुर्गा तथैव नारसिंहिका कालिका चामुंडा माला
च शिवदूती तथा परा वाराही कौशिकी चैव तथा माहेश्वरी प्रिया

शंकरी च जयंती च मंगला कालिमर्दिनी पालिका चैव मेधा च शि
वरूपा च शाकंभरी भीमा शांता च उग्रा च भ्रामरी रुद्ररूपिणी अंबि
का च क्षमरूपा च क्षेमा क्षेमंकरी तथा धात्रीरूपा स्वधा स्वाहा तथैव
वह्निरूपिणी अपर्णा च तथा माया घोररूपा प्रियंवदा ब्रह्मांड
वाणी ब्राह्मी च पंचाशन्मातृका स्मृता इमेतत्कथितं सम्यक्केव
लेन च भक्तितः एतास्तु मातृका देव्या ब्रह्मांडं सचराचरं आप्य
तिष्ठति चार्वंगि नानामूर्तिधराः परा शक्तिमंत्रे विष्णुमंत्रे शैवे सौ
रे च पार्वति अनन्ते वैष्णुमंत्रे च गणेशे वरवर्णिनि मातृकाध्व
वनीरूपा मंत्रविग्रहरूपिणी ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्च सदा।
शिवः ते सर्वे चंचलापांगि निष्कलाश्च निरिंद्रियाः देवादीनां वरा
रोहे मंत्रनालिकदा च न शब्दब्रह्मयदा याति तत्र मंत्रं तदा भवेत्
पंचाशद्ध्वनी सर्वा शब्दब्रह्मस्वरूपिणी ब्रह्मणः कारणं नास्ति
प्रकृतिं रतिभाविनि प्रकृतेर्या वरारोहे सादीनां सर्वसंमता दी
तायां चंचलापांगि प्रशस्ता ध्वनीकला पंचाशन्मातृका यास्ता
ध्वनी परिगीयते ध्वनीरहितं देवि कुतो विद्या कुतो मंत्रं निर्गु
णपरं ब्रह्म प्रधानाः ध्वनीगणाः इति श्रीकामधेनुतंत्रे देवदे
वीसंवादे नवमः पटलः ९ श्रीशिव उवाच यथाज्ञानं च रूपं यस्त
ष्यां मंत्रे प्रतिष्ठिता देवीनां ज्योतिषः ध्वनोवर्तते प्रकृतेः कलाः

काम ये॰ तं॰ ११

अथांतरात्मा परमं ज्ञानात्मा स च वरानने वर्त्तते भगवती कृष्णः षो
डशः प्रकृतेः परः प्रकृतिं हि विना देवि ज्ञाता तद्ब्रह्म सनातनः
अतएव वरारोहे स एव श्रीसदाशिवः जायत्व मेस मूर्तिं घांतरी
यावत्स्वर्णिनि नास्ताः सर्वा वरारोहे भगवती परमा परा कार्यका
रणकाले च गणनीया वरानने सूक्ष्मात्सूक्ष्मपरं सूक्ष्मं सूक्ष्मरूपेनि
रंजनं कोटिसूर्यप्रतीकाशं निर्मलं ज्ञानमुत्तमं हृदि भावयथा
वेगितेनः पुंजमहत्प्रभं दलितांजनपुंजाभं वर्णराजं वरानने
त्रिभंगललिताकारं बाहुद्वयविराजितं शिखिपिच्छयुतं चंद्रभ्र
मरैः शोभितं परं पीतांशुकपरीधानं वनमालाविभूषितं रत्नकुं
डलसंयुक्तं स्फुरद्गंडमनोहरं कंबुकंठसमोपेतं श्रवणांजनमो
हितं श्रीवत्सकौस्तुभोद्दीप्तं ग्रामानुवाकरांजितं आरक्तनयन
द्वंद्वं कोटिविद्युत्समप्रभं आरक्तचरणद्वंद्वनूपुरारावसंयुतं आ
रक्तकरतलस्वच्छं गुंजमालाविराजितं शरद्ब्रह्मसमयं विलासं का
रेणाहृजल्पितं एवं रूपं समुत्पन्नं हृदिमध्ये वरानने जायते का
मबीजाश्च सूक्ष्ममध्ये सुलोचने सूक्ष्ममध्ये स्थिता देवी कामबीज
स्वरूपिणी लकारसंयुता या सा कुलमाना प्रगीयते सर्वेषु वि।
स्वमंत्रेषु कामबीजं परात्परं हृदि सूक्ष्मे महेशानि विलोमं मंत्रं जपे
त्प्रिये ततो वै कामबीजात्तु जायते विष्णुविग्रहः अतः काममय

विष्णुरादिभावयपार्वति कामिनीयामहेशानि विष्णुमाताप्रगी
यते अतोविष्णुमातृवर्णेर्वर्णराजमवाप्नुयात् ककारःकामिनी
साक्षाल्लकारःपृथिवीश्वरी रतिस्तुमर्दिनीसाक्षात्नादस्तुयोनिरू
पिणी विंदुःकुंडलिनीरूपशिवशक्तिमयंप्रिये ईदंबीजंमहेशा
निविष्णुमातापरात्परा निरतोविष्णुदेवःअत्राज्ञायतेध्रुवं अ
नएववरारोहेब्रह्मणःकारणंपरा क्लींकारबीजरूपायासाप
रापरिगीयते परात्परतरासापिवह्निमंडलसंयुता कामिनी
सामहेशानिपृथिवीतस्याआसनं कदाचित्पृथिवीमध्येकदाचि
द्वह्निमंडले वसतेकामिनीदेवीनादविंदुसमन्विता जन्मलब्ध्वा
महाविष्णुःकूर्चबीजंजपेत्प्रिये अनेनप्रजपेन्मंत्रंकुंकारंवरवर्णि
नि विष्णोर्विग्रहणेनतत्स्वयंप्रकृतिमूर्तिमान् प्रकृतिःपरमारा
ध्यादेवानांनगनंदिनि कुंकारंपरमाख्यंबीजरत्नंशृणुप्रिये
षष्ठिःस्वरापरिचयोवियद्बीजंशशिप्रभं तस्योपरिवरारोहेसदा
विंदुविभावय काममन्मथकंदर्पअत्तरषजसंज्ञकः मीनके
तनमहेशानि पंचबीजंप्रकीर्तितं मायाकूर्चंवधूबीजंलक्ष्मीबीजं
चपार्वति प्रणवंचमहेशानिस्वयंवर्तदर्पणंतथा सपिंडवत्तथा
देवीयेषुयासत्वविद्यते तंमंत्रंप्रतिसिद्धंस्यात्सारःप्रकृतिरूपि
णी एवंबीजस्यकृत्यानामर्वासांभवतिप्रिये तन्मंत्रंप्रजपेद्देवि।

काम॰ धे॰ तं॰ १२

बीजध्यानं पुनः प्रिये पंचविंशद्दशधा कृत्वा मंत्राणां बीजसाधनं त
स्माद्बीजात्समाकृष्य देवतारूपमुद्भवं देवध्यानं ततः कृत्वा इष्टमं
त्रं ततो जपेत् पुनर्ध्यानं देवतायाः पुनर्जीवं कुरु प्रिये पंचविंशद्दश
धा कृत्वा देवादिनामपूर्वकं ततः समुच्छंदां जप्त्वा कुल्लकां दशधा
जपेत् आद्यंते सतनमंत्रं च दत्वा अष्टोत्तरं जपेत् तन्मंत्रं प्रजपेद्देवि प
चं सिद्धिमुपालभे इति श्रीकामधेनुतंत्रे देवदेवीसंवादे एकादशः
पटलः ॥ ११ ॥ श्रीमहादेव उवाच अथ वैकं प्रवक्ष्यामि रहस्यमतिगो
पनं अकृत्वा ध्यानतत्त्वं च अष्टतत्त्वं तथैव च अकृत्वा वर्ष्यतो याति
नात्र कार्या विचारणा ततो जीवत्वमाप्नोति मंत्रः सिध्यति तत्क्षणा
त् अथवा परमेशानि मंत्रवर्णो यथा तथा प्रणवं पुटितं कृत्वा अ
नुलोमविलोमतः तदेव परमेशानि जीवत्वं प्राप्यते मंत्रः एक
धा वा त्रिधा कृत्वा यदि कुर्याद्वरानने तदा सिद्धिमवाप्नोति नान्य
थामरपूजिते जीवत्वं हि विना देवि यं मंत्रं प्रजपेत्सुधीः तज्जपं वे
चलापांगि शावमेव न संशयः सदा निद्रान्वितो मंत्रो जीवहीनस्तथा
वेति श्रीं क्लीं ह्रीं हूं स्त्रीं श्रीं ॐ कथं सिद्धिमवाप्नोति निद्रायां वर
वर्णिनि जीवन्यासेन चार्वंगि निद्राभंगो भवेद्ध्रुवं विद्धि तत्त्वं प्रजा
प्यायता न तत्त्वं च सुंदरि प्राणतत्त्वं च चार्वंगि देवतत्त्वं तथैव च ज
पतत्त्वं मंत्रतत्त्वं ध्यानतत्त्वं सुलोचने अंतरे अंतरे देवि अकृत्वा प्रज

यदि संयोगं यत्र वै योगं प्रकुर्वंते तदा स्वतः केवलं कलिका
बीजं तद्वर्णसंस्थं जिते आगतं मम वक्त्राद्यदुक्तं तन्मुखे सदा
मंत्रं श्रीवामदेवस्य इति तेन कथितं प्रिये एतन्मंत्रं महाशुद्धं
ईशानमुखसंस्थितं एतन्मंत्रप्रभावादि कालक्रूरं पितामहं
एतास्तु मातृकावर्णाः सप्तग्राममध्यवर्तिनी एता वर्णा वरारो
हे महायोगमयी सदा एतैर्हि विना देवि न योगं जायते मम
योगमार्गे भक्तिमार्गे मुक्तिमार्गे च सुंदरि ध्यानमार्गे स्वरज्ञा
यां जपमार्गे तथैव च एतास्तु वर्तिवर्णाः कार्यकारणरूपि।
णी एतन्मंत्रं न विज्ञाय न जप्तव्यं कदाचन एतन्मंत्रमविज्ञाय य
स्तांगं मंत्रं हितास्मरति पठन्नरकमाप्नोति पितृभिः सह नान्यथा
सर्वधर्मेषु यद्धर्मं सर्वयज्ञेषु यत्फलं सर्वदानेषु तीर्थेषु यत्फ
लं प्राप्नुयाद्द्विज तत्फलं समवाप्नोति वर्णानां ध्यानमात्रतः व
र्णध्यानमविज्ञाय वर्णानां तत्तथैव च पुराणं वाचको यस्तु ध्रुवं
नरकमाप्नुयात् कोटिवंशान्समादाय स द्विजो नरकं व्रजेत्
यथा वक्ता तथा श्रोता नादयोरपि फलं समं कथमज्ञानतो मूर्खो
ज्ञात्वा वर्णविनिर्णयं पुराणानि पठित्वा वै निश्चयं नरकं व्रजेत्
निश्चयं च महेशानि दारिद्र्यं घोरमाप्नुयात् निश्चयं रोगमाप्नोति
जंबूद्वीपस्य भारते सत्यात्मना तनो देवो वाणी त्रिपुरसुंदरी ।

काम
धे०
तं०
१२

13

सर्व्वासांभुवनीनांचभवानीचाधिदेवता ध्यायेद्देवीमहामायां
मातृकांजगदीश्वरीं रक्तपद्मासनगतांरक्तांशुकपरिष्कृतां
रक्तचंदनलिप्तांगींरक्तवस्त्रोत्तरीयिणीं रक्तबिंबफलाभासां।
राकाचंद्रशुचिस्मितां भ्रमद्भ्रमरलीलाभनयनत्रयराजितां क
टाक्षशतसंयुक्तांबाहुद्वयविनोदिनीं रक्तालंकारसंभगांगवि
भंगललिताकृतिं हास्ययुक्तांप्रफुल्लास्यांज्योत्स्नाजालसमच्छ
विं मृणालसदृशाकारबाहुवल्लीविराजितां केयूरसंयुतांर
त्नाँकैर्देवकीरकलांनी नखानांकरणयोनैर्भरणांपरिमोहय
एवंध्यात्वामहामायांभवानींशिवमोहिनीं अपरैकंप्रवक्षामि
रहस्यंपरमाद्भुतं हृत्पद्मेद्वादशदलेवराढ्येपरिभावयेत् यस्य
देवस्ययद्बीजंप्रफुल्लकलिकांतथा ध्यात्वादेवीयथाशक्त्यात
स्मादाविर्भवेत्स्वयं शक्तिर्वाविष्णुदेवोवाशिवोवासूर्यएवच
बीजाद्भवमयमेदेविपरंब्रह्मनिरंजनं बीजध्यानंविनादेविकथ
मुत्पद्यतेहरिः सदाशिवोमहादेवःकथमुत्पद्यतेस्वयं सदा
शिवस्यजननीबीजरूपासनातनी इतियोवेत्तिसज्ञानीसए
ववीरसत्तमः गुरुर्योगपःसएवस्यात्सएवपरमःशिवः सर्वे
षांचैवबीजानामेवंध्यानंसमाचरेत् शुक्लविद्युत्समाकारांन
यनत्रयधारिणीं कटाक्षविशिखैर्युक्तांवरवीजसमन्वितां

त्रिभंगललितालाकारंचारुचूडविराजितां पुंडरीकोपविष्टांच
राकांबंद्रग्रस्ततीपदं नानागंधप्रलिप्तांगीं स्रग्गंधीमाल्यसंस्कृतां
नानाभरणलिप्तांगीं मेखलाक्षुद्रकपरिष्कृतां वीणावाद्यविनोदेन
तुष्टसंतीजगत्त्रये आद्यावह्ममयीदेवीग्रह्णवीजस्वरूपिणी ग्र
ह्माद्यादेवतायास्याश्चरणोपत्तिताभुवि भजेहमातृकादेवीवेद
मातासनातनी ग्रनेनविधिनाध्यात्वासर्वांसांभवतिप्रिये वी
जमेतन्महेशानिप्रथमेदशधाजपेत् तन्मंत्रंचबलाबाणिग्या
नेदक्षलेस्थितं ततोध्यात्वापुनर्नैर्वादशधावरवर्णिनि प
ततत्वमविज्ञायप्रजपेद्यदिपार्वति सर्वपापमयःसोपिभवे
त्सकरवद्विजः तत्वमेतन्महाशुद्धंयोगमार्गेस्थितंसदा त
वस्नेहान्मयाख्यातंग्रतिगुह्यंसुलोचने तंत्राणांसारमेतत्व
सर्वसिद्धिप्रदायकं सयोगीयोगवेत्ताचयोगात्मायोगनाय
कः योगाचार्योयोगमायायोगानंदप्रदायकः इतिश्रीकाम
धेनुतंत्रेदेवदेवीसंवादेद्वादशःपटलः १२ श्रीमहादेवउवा
च ग्रथनासंप्रवक्ष्यामिग्रानंदपटलंप्रिये शृणुतत्वंप्रवक्ष्या
मिसुंदरंसुमनोहरं एतस्मिद्वादशादलेविद्युत्कोटिसमन्विते
भावयेन्मंत्रवीजानियस्यायाइष्टदेवता भावयेत्प्रथमंवीजंव
राकोपरिपार्वति ग्रन्यानिसर्ववीजानिपंचमध्येप्रभावयेत्

काम। धे। तं। १५

ध्यायेत्प्रथमावर्णान्सर्वैश्वर्य्यैश्वर्यदायकं एवं हि दशधा जप्त्वा
क्रमाद्बीजं जपेत्प्रिये दशधा दशधा देवि प्रजपेद्बीजमुत्तमं तत
स्तु वीजमध्ये तु ध्यायेदिष्टं सुलोचने तस्माद्बीजाद्वरारोहे देव
*ता जायते ध्रुवं तस्य देवस्य चांगानि शीर्षदेहं सुंदरः चरणा
केशपर्यंतं नानावेशमयं प्रिये निरीक्ष्य मनसा भक्त्या पुनर्ध्या
नं समाचरेत् ततस्तु प्रजपेद्बीजं वर्णानं दशरूपिणी प्रजपे
त्प्रथमं वीजं वीजध्यानं ततः परं एतत्प्रथमं वीजं साधनं दु
र्लभं प्रिये सर्वेषां वीजवर्णानां यदि जानाति साधकः ध्यानेप
रमकल्याणं वर्णं वर्णैश्वर्यप्रदायकं एतत्तावच्चंचलापांगि मात्र
काध्यानमाचरेत् तदेवं सहसा देवि सर्वासां जायते ध्रुवं यस्य
मंत्रस्य यद्वर्णं तस्य ध्यानेष्टप्रदायकं वीजात्तु जायते विष्णुरव
तारवरः प्रिये वीजात्तु जायते रामो वीजात्कृष्णः प्रजायते स्था
वरं जंगमं देवि सर्वं वीजात्प्रजायते आज्ञाचक्रे विशुद्धे च मूला
धारे ततः प्रिये स्वाधिष्ठाने ततो देवि मणिपूरे च पावित्ते अ
नेन विधिना देवि कुर्यात्साधकसत्तमः प्रसन्ने कुरुते यस्तु स
सिद्धः शिव एव सः प्रसन्ने चंचलापांगि षट्चक्रं भ्रामयेत्तु यः
साधनाच्च महेशानि तस्मात्कुरु मत्प्रिये नित्यं च हृदये कुर्या
द्दर्पणवद्दर्शिं प्रिये वीजस्य चंचलापांगि ध्यानं मंत्रेष्टदायक

14

मात्राक्षैः प्रकृतिर्देवि वीजरूपा सनातनी सनातनस्य जननी
सर्ववर्णमयी प्रिये जपस्य प्रथमे काले वीजस्य तत्त्वमुच्चरेत् त
तस्तु प्रजपेन्मंत्रं ससेतुं वरवर्णिनि वीजतत्त्वमविज्ञाय प्रजपे
द्यदि कोटिधा सर्वं तस्य वृथा देवि प्रारण्ये रोदनं यथा तत्त्वत्रयं
प्रवक्ष्यामि मंत्राणां शृणु सुंदरि विभाव्य नाभिपद्मे तु वायुवीजं
सविंदुकं मंत्रस्य प्रथमे वायुवीजं मध्ये विचिंतयेत् ध्यात्वा वी
जं महेशानि प्रजपेद्वीजमुत्तमं दशधा प्रजपेद्वीजं दशधा ध्यान
मेव च दशतत्त्वयुतं मंत्रं तदैव सहसा भवेत् मेशाख्यवीजं वा
वैगि वह्निवीजं विचिंतयेत् लत्मेव ह्निमध्ये तु ध्यात्वा वीजं
हुताशनं दशधा प्रजपेन्मंत्रं दशधा ध्यानमेव च विंशतत्त्वयु
तं मंत्रं तदैव सहसा भवेत् मात्रस्वरा ततो देवि गलितामृत धा
रया आत्माख्यवीजं वा वैगि सर्वावयवसंयुतं तदैव सहसा कु
त्वा ललाटे वरवर्णिनि यवलस्य तु मध्ये तु तद्वीजं भावयेत् प्रिये
दशधा च जपित्वा वै वीजं च दशधा स्मरेत् तदामृतमयं वीजं स
हसा भवति प्रिये विसमंत्रेषु देवेशि वह्निवीजेषु भावयेत् त्र
मन्त्रं वैषु मंत्रेषु भावयेद्वरवर्णिनि त्रिंशत्तत्त्वयुतं मंत्रं तदैव स
वति प्रिये तत्त्वातीतं स्वयानीतं नानाविधो जपेत्प्रिये अनेन वि
धिहीनं वा तज्जपं विफलं सदा तत्त्वहीनं जपेद्यस्तु विःफलं सततं

प्रिये शोधयेद्यत्नाद्देवि शुद्धमृतं ज्ञानसंयुतं एतत्तत्त्वमयं भद्रे शी
घ्रसिद्धिप्रदायकं यो जपेत्तत्त्वरहितं तस्य हानिः पदेपदे तस्मा
त्तन्त्रे शुभाराध्य तस्मान्मन्त्रं जपेत्सुधीः अनेन विधिना देवि सर्व
तत्त्वमयं मनुः कुलमन्त्रेषु रामेषु श्रवनारवरेषु च सौरगाणप
त्येदेवि शाक्तिमन्त्रेष्वयं प्रिये शिवमन्त्रेषु चार्वङ्गि अमन्ते त्रेतत्थे।
वच त्रिंशत्तत्त्वयुतं कृत्वा मन्त्रं वीजस्य लोचनं एवमेव विधानेन
वीजं जीवत्वमाप्नुयात् तस्माद्वीजाद्वरारोहे समुत्कुलदयस्त्रये
उत्पद्यन्ते वरारोहे नान्यथा वरवर्णिनि एतन्मन्त्रं समुत्कृत्य प्रज
पेद्दिनिशं मन्त्रं प्रजपेद्दिनिशं विद्याशौचाशौचं न वाचरेत् मन्त्र
वात्तरबहिः स्यात्कुतो तमानवः प्रिये देवतायां वरारोहे प्रतिमा
बुद्धिर्जायते किं तस्य जपस्य नायां संवैर्व्यर्थं कदर्थनं इतितेक।
थितं देवि वीजतत्त्वस्य गोपनं कस्यचिन्नैव वक्तव्यं यदि कल्याण
मिच्छति एतज्ज्ञानमविज्ञातः सकयंत्र्यनाश्वजेत् इति श्रीका
मधेनुतन्त्रे देवदेवीसंवादे त्रयोदशः पटलः १३ श्रीमहादेव्यु
उवाच देवदेव महादेव संसारार्णवतारक कृपया कथयेशान
वकारतत्त्वमुत्तमं श्रीमहादेव उवाच पूर्वोक्तं चचलापाङ्गि गाय
त्रीतत्त्वमव्ययं गायत्री या वरारोहे वतवकारसंयुता कान्ते शेष
वकारं च वरुणादिभावय पवर्गं वा भवीजेन च हदिभावय पार्वति

यवर्गं यस्तु देवेशि वायुबीजं तदुच्यते यकारस्य चतुर्थो यवा
युबीजं प्रकीर्तितं यवर्गं च वायुबीजं मयैव निश्चितं प्रिये स
वैविद्यास्तु तत्रेषु वरुणं भावय प्रिये वह्निमायायुतानां च पव।
र्गं हृदि भावय गायत्रीसंस्थिता देवि पापोच्चारनकर्मणि एवं
क्रध्यानमार्गेण भावना परिकीर्तिता ध्यानभेदेन चार्वंगि यिवका
रं भावय प्रिये अधुना संप्रवक्ष्यामि ककारध्यानमुत्तमं विशे
षेण एव वक्ष्यामि ककारस्यातिदुर्लभं षन्नोक्तध्यानं देवपटले अधु
ना कथयामि ते तद्ध्यानं नास्ति यत्कोपातिदुर्लभं मोक्षमव्ययं येन
ध्यानप्रकाशेन मंत्रं तंत्रं च सिध्यति एवं तद्ध्यानमात्रेण शिवतु
ल्यो भवेन्नरः ककारध्यानमात्रेण सर्ववर्णा हि सिध्यति ककार
भावनाश्चैव सर्वासां वासना भवेत् तस्मात्सर्वप्रयत्नेन ककारं
हृदि भावय प्रातरादित्यसंकाशां सिंहपृष्ठोपरिस्थितां रक्तपद्मो
पविष्टां च रक्तवस्त्रपरीष्टतां चतुर्भुजां त्रिनेत्रां च पंचबाणधर
धरां वरदाभयदां चैव पीनतुंगपयोधरां मृणालसदृशाकार
चतुर्वाहुपरीष्टतां शंखकंकणकेयूरग्रैवेयपरिशोभितां सु
गंधिमल्लिकाहारैः कवरीमध्यशोभितां त्रिभंगलताकारचारु
चूडाविराजितां शिखिपक्षयुतां चूडां नानारत्नसमन्वितां ईष
द्धास्यप्रसन्नास्यां शृंगारजितनासिकां माणिक्यकिरणोद्योतदं

काम धे० तं० १६

18

तपंक्तिविराजितं चंद्रद्युम्णसमाभासनखपंक्तिमनुत्तमां स्वर्ण
सूत्रयुतहाररत्नचारुविनिर्मितां कटाक्षविशिखोद्दीप्तभ्रूलतां
परिशोभितां नीलचित्रयशोतोरणानयनत्रयराजितां रम्यरंभास
माकारऊरुद्वयविराजितां हृल्लेखासंपुटकरत्नकिंजलिशो
भितां गुह्यवर्गैः सेवितां वगुह्यवर्गैः प्रपूजितां सिंदूरतिलकाल
कामंजनेनांकितलोचनां ललाटपट्टिकाशुभ्रग्रंइंद्रपरीएतां ब्र
ह्मादिदेवतावृंदैः शिरसाधार्यतेचयो किमाद्यांकामिनीमातृका
काखरूपिणी एवंध्यात्वावरारोहेप्रजपेद्यदि साधकः तदेव।
सहसासिद्धिर्जायतेतत्सुंदरि वर्णितानंविनादेवि नजपेत्पश
वः क्वचित् किंतस्यध्यानसंज्ञायां प्रयस्यपापशतंशतं किंतस्यजप
होमेनचंद्रसूर्यस्यपर्वणि वर्णितानंविनादेवि वैस्रवःशैवएव
व एकदानोचयेदेवि प्रस्तावावर्णदीपनी सर्वासांमंत्रविद्यानां
दीपनीयाप्रकीर्तिता सर्वेषांशास्त्रमध्येतुप्रशस्तावर्णदीपनी
शक्तिमंत्रेनयामारेगणेशमर्च्यतेसदा तामानंतेत्रउरूवीतदी।
तोस्मोशुविस्मिते श्रीमहादेवउवाच रहस्यंतत्रवक्ष्यामित्रांते
नगोपनंशृणु यत्कृत्वासाधकोयातिपरमंपदमुत्तमं ललाटे
तिलकंकृत्वाचंदनेनसुगंधिना कर्पूरागुरुकस्तूरीरोचनाकुं
कुमैः प्रिये तिलकंधारयेद्यत्नाद्देवीकृतमनोहरं त्रिकोणस्व

दं सत्वं कुतिलकं जनमोहनं एकीकृत्य यत्नेनापि नानावस्तु
कारयेत् राजाधीरकवर्णेन मोक्षाधीश्वतवं दनैः वशयेद्वनया
देवि तिलकं कारयेत्सुधीः मोहने वै बलापांगि अगरुकुंकुमादि
ना कुलसंगंधवर्णो देहशत्रोर्मारणकर्मणि ललाटे बाहुमूले वा।
तथा स्कंधे हृदये च हस्तपार्श्वयुगले दृष्टे नाभौ च सुंदरि ३
रुहृदये गंडयुग्मे च पुनः पादहृदये च विलिखेद्यत्नतो देवि ककार
वर्णमुत्तमं तत्र बिंदुयुतं कृत्वा विलिखेद्द्वावर्णानि तदेवमरु
सादेवि विद्यामंत्रे च सिध्यति मोहयेदखिलान्लोकान्वशयेदि
ष्टदेवतां ४ देवं वशं कृत्वापरकराप्रजपेद्यदि तत्क्षणाद्देवला
पांगि देवत्वमुपजायते देवत्वं हि विनादेवि कुतः एतावतोज
पः अन्यथा पेन वक्रजावैस्त्रवे च विशेषतः ललाटे तिलकं कु
नारोचनासंयुविस्मिते तन्मध्ये विलिखेद्वर्णं ककारं सुमनोहरं
सामान्यमेतत्कथितं तिलकं जनमोहनं एतत्तिलकं चैव व
शायेद्यदि केशवं जपासनं दशाम्यांतु तदारभ्य च प्रमदं एतद्ध
र्णोमविज्ञाय विषयेस्तस्तुपास्रहे सभ्रष्टः स च पापिष्टः रौरवं।
नरकं व्रजेत् इति श्रीकामधेनुतंत्रे देवदेवीसंवादे चतुर्दशः पट
लः १४ श्रीदेव्युवाच देवदेव महादेव नीलकंठ त्रिलोचन सु
तंत्रं कथयेशान यद्यहं तव वल्लभा श्रीमहादेव उवाच शृ

काम
धे॰
तं
८

शृणु देवि प्रवक्ष्यामि ज्ञानं परमदुर्लभं येन विज्ञानमात्रेण विप्रः
साक्षाद्धि सर्वः प्रिये हृत्पद्मे द्वादशदले स्वविद्यां भावयेत्सुधीः क
कारं भावयेद्वाद्यो परा ह्यपरि पार्वति पत्रे पत्रे ततो देवि स्वविद्यां
प्रजपेत्सुधीः मंत्राणां प्रथमं बीजं ध्यानाद्देवि प्रजपेत्सुधीः तस्मा
न्मंत्रात्ततो देवि जायते देवविग्रहः देवतां च ततो ध्यात्वा नत्रोक्तध्या
वर्त्मना ध्यानं च त्रिविधं देवि समानफलदायकं कृत्वा ध्यानत्रये
देवि ब्रह्मरंध्रे परमेश्वरि सहस्रदलपद्मान्तर्मध्ये ध्यानेन गुरोर्मु
खात् स्वविद्यां भावयेद्देवि कोटिविद्युत्समाकृतिं भावयेदनि
शं भक्त्या सिद्धो भवति तत्क्षणात् बीजमात्रं जायते देवि रामकृष्ण
दयश्रिये ते सर्वे वं चलायां गिबीजात्र जायते ध्रुवं ज्ञात्वा स्मरात
ने तत्त्वं प्राणेद्दपटले स्थितं पूजा कार्या च वा वेगि सर्वसिद्धिमयो
भवेत् इदं सनातनं तत्त्वं प्रज्ञाना नरकं व्रजेत् शूद्रः शूद्रमुखात्
श्रुत्वा विद्यां वा मंत्रमुत्तमं रौरवं नरकं याति यंतं तमाप्नोति निश्चितं
न शूद्राय मतिं दद्यात् न च शूद्रं कदाचन उभयोः नरकं देवि को
टिकल्पसमाप्तं प्रज्ञानाचारो द्विजो यस्तु शूद्राणां गृहे वसः य
दि शूद्रो भवेद्देवि सत्यवादी जितेन्द्रियः स्वधर्मे निरतो भक्त्या।
श्रुत्वा द्विजगुरोर्मुखात् सर्वसिद्धिमवाप्नोति शीघ्रं देव समाप्नुया
त् यद्देशे विद्यते शूद्रः पातकी मंत्रविक्रयी तद्देशं पतितं मन्ये

तस्याराजाचपातकी स्यात्कथंवैचलापांगि जिह्वायांप्रजपेन्मंत्रं
तस्याजिह्वावरारोहे मूत्रशोणितविड्यथा तन्मुखंमूत्रविट्कुं
पंग्रन्थंविष्ठासमंसदा तज्जलंशोणितंसाक्षात्चांडालसमजाति
षु पृथिव्यांयानितीर्थानिसर्वदेवमयानिवै आलोकात्तन्मुखं
तीर्थंतत्स्थानंत्यजगच्छति तीर्थकोटिःपलायंतेदृष्ट्वातन्मुखं
मंडलं गंगाजलंपरित्यज्यतत्रस्थानमाप्नुयात् महापातकि
नोयेचब्रह्महत्यादिसंयुताः त्रैलोक्यपावनीगंगातास्तुनात्रन
संशयः मंत्रविक्रयिणःसर्वामहानरकगामिनः कलौतुभार
तेवर्षेभविष्यंतिनसंशयः मंत्रविक्रयिणःसर्वाःश्वानयोनौप्र
जायते तत्संसर्गिस्त्रयोविप्रश्चर्मकारसमएवहि चांडालसदृशः
सोपिसमएववर्णिशंकरः स्वधर्मनिरतःशूद्रोविद्यामंत्रपूर्णो
त्रियः स्वधर्मःपृथिवीमध्येसमएववैश्यवेत्तमः स्वशाक्तःशि
वभक्तश्चगाणेशःसौरएवच एतत्तेकथितंदेविवर्णज्ञानं।
विनिर्णये इतिश्रीकामधेनुतंत्रेदेवदेवीसंवादेज्ञाननेएप
वदशःपटलः ११ श्रीमहादेवउवाच अपरंसंप्रवक्ष्यामिरह
स्यंपरमाद्भुतं यत्कृत्वाचंचलापांगिरावणाद्यानिशाचराः
अवाप्यमतिवृद्धिंचत्रैलोक्याधिपतिःप्रभुः सांकेतंपरमं।
गुह्यंभक्तानांपृथक्पृथक् एतत्तत्त्वंनजानातिहरिर्ब्रह्मा।

पुरंदरः पंचाशद्वर्णसंकेतेन सावधानावधारय अकृत्वा साधको
याति रौरवं नरकं व्रजेत् रौरवं नरकं याति पुनरावृत्तिदुर्लभं
विशेषविस्मये देवि कुर्यादेहस्य बन्धनम्ः अकृत्वा वै स वै याति
नरकान्नवकोटिशः मासि मासि वरारोहे शनिभौमदिने प्रिये
प्रातःस्नानं समासाद्य कृत्वा संध्यां समाप्य च सूर्यायार्घ्यं ततो दत्वा
स्मारं प्रक्षाल्य नायच यागमंडपमासाद्य भूतशुद्धिं विधाय च कु
र्यान्न्यासं मातृकायाः प्राणायामं ततः परं न्यासमानं मातृतः कुर्या
न्नेत्रमार्गेण पार्वति शुक्लाम्बरधरः स्रग्वी गंधलिप्तकलेवरः र
क्तासनं समासाद्य कृष्णासनमथापि वा प्रलिख्य ताम्रपात्रे तु सिं
दूरं कुंकुमं चंदनं विलिख्य मातृकावर्णान् यस्मिन्मात्रे हृष्यकरथकं अ
कारादितकारान्तं सबिंदु च हसंयुतं महापद्मान्तरस्थानादानीय
वहन्वकर्ककं वामनासापथेनैव श्वासं रुद्ध्वा जलौ लिखेत् तस्यैव
वेचलापाणि कुर्यात्तं च मर्पसं च यं ध्यात्वा तदूर्जयेद्देवी क्रमेणैव
हृष्यकरथकं गंधैर्नानाविधैर्देवी पुष्पैर्नानाविधैस्तथा धूपैर्नाना
विधैर्देवि दीपैर्नानाविधैस्तथा नैवेद्यैर्विविधैर्देवि वस्त्रैर्विधमयै
स्तथा रत्नानानाफलादीश्च पूजयेत् परमेश्वरी नानापुष्पमयैः।
हारैः शुक्लादिगंधसंयुतैः महापद्मवनान्तस्थ ग्रंथोत्तरयति वै च
न प्रजपेन्मातृकावर्णान् वर्णान् वर्णान् हृष्यकरथकं प्रतिपद्मेन जपेन्मंत्रं

यस्मिन्मन्त्रे प्रवर्तयत्यते तस्मिन्पद्मे वनान्तस्थः सविद्यां प्रजपेद्भक्तं स
प्रसन्नामातृकास्थानं दैव सहस्राभिये अक्षतामातृकापूजां मासिमा
सिवराननने इष्टविद्याजपे पद्यस्तनस्य हानिं शृणु प्रिये विशनाउँग।
नाम्नामातृकां जगदीश्वरी सर्वेषां वैसवानां वशानां नावरवर्णि
नि शैवानां च महेशानि अन्येषां चैव सुन्दरि हरंति वैसवादीनां नाम
ध्यावचनं मम प्रशस्तामातृकापूजादीनां यामनपवर्हि शरण्यां
हि चार्विगि पूजनीया स्त्यकृत्यकृ मातामा सर्वविद्यानां मेशा एणावश
थक्रत्यक्रु यस्मादुत्पद्यते विद्या मंत्रं च सर्ववेदिते तस्मात्प्रयत्नतो दे
वि तासां पूजा विधीयते नान्यथा निष्फला पूजा संवत्सरकृता यथा
अनेन विधिना देवि पूजयेद्यदि मातृकां प्रसन्ना मातृका देवि पुत्र
त्वे नानुकल्पते रहितो मातृकापूजा जपपूजनतत्परः तस्य सर्वम
हामाया मातृका जगदीश्वरी हरंति मंत्रतेजांसि शाश्वविद्यायशो
बलं अपरैकं प्रवक्ष्यामि रहस्यं परमाद्भुतं अनुलोमविलोमेन का।
थितं शृणु पार्वति अनुलोमविलोमं वर्तते वहि महेश्वरि सर्वेषां।
जपयज्ञानां सहस्राफलभाग्भवेत् सहस्रासिद्धिमाप्नोति सहस्राय
मिमाप्नुयात् सहस्रा अर्थमाप्नोति सहस्रामोन्नमाप्नुयात् पौर्णिमा
स्याममावस्यां मासि मासि प्रयत्नतः यः करोति प्रसन्नात्मा स एव श्री
सदाशिवः ज्ञात्वा संदीपनीविद्यां आनंदपटले स्थितं अत्तनादी।

काम
धे०
तं०
१९

19

पंनोविद्यांचतुर्वर्गफलप्रदां रहस्यमेतदज्ञात्वासर्वंचविफलंभवेत्
इतिश्रीकामधेनुतंत्रेदेवदेवीसंवादेषोडशःपटलः १६ श्रीमहा
देवउवाच एतत्तत्त्वमविज्ञायनभावोजायतेप्रिये नदेवोविद्यतेका
ष्ठेनपाषाणेचपार्वति भावेषुविद्यतेदेवि भावोमोक्षस्वरूपक
दिव्यभावोवीरभावः सदैवसहसाभवेत् अन्यथाचेवलापाणिपशु
भावमयःसदा स्वभावेनविनादेविकथंसिद्धिर्भवेत्प्रिये तस्मात्प्र
यत्नतोदेविवीरभावमयोभवेत् अनेनैवविधानेनमातृकांजप
येन्नयः सएवःदिव्यभावःस्याद्वीरभावःसएवहि सएवनीसगुणी
लोकेमातृकांयस्तुप्रजपेत् श्रीमहादेवउवाच अपरंकंप्रवक्ष्यामि
सामान्यंवरवर्णिनि एवोकध्यानमावर्थ्यप्रजपेन्मातृकामंत्रं क
कारध्यानमात्रेणसर्वसिद्धिःप्रजायते जप्त्वाककारंचार्वंगिसर्वा
सांभवतिप्रिये सर्वासांमातृकाप्रजाककारंकेवलंचवा ककारं
सर्ववर्णानांमूलप्रकृतिरूपिणी तस्मात्प्रयत्नतोदेविककारंप्र
जपेत्प्रिये अमहंप्रजपेद्देवीप्रथमंप्रजपेत्सुधीः सर्वासांफलमा
प्नोतितदाभावमयोभवेत् ककारप्रजनाद्देवसर्वासांप्रजनंभवे
त् एतदहंकृतेतेयस्तुप्रतिमासिवरानने दिव्यवीरःसएवस्यात्सर्वे
प्रजाफलंभवेत् अकृत्वाचेवलापाणिमनसापिचसंस्मरेत् सर्वप्र
जामयःसोपिसर्वभावमयःसदा भावतत्त्वमविज्ञायविद्वेमंत्र।

कथंजपेत् शिवमंत्रंचसौरंचगाणेशंसकथंजपेत् भावतत्त्वंवि
नादेविप्रजपेद्यदिकोटिधा सर्वंतस्यवृथादेविनरकंचपदेपदे
सकथंचंचलापांगि दिव्यवीरगुरुर्भवेत् पशुवत्सवदादेविसप
वपशुगुरुःप्रिये भावतत्त्वेनरहितःसकथंपंचमंयजेत् वेसवा
स्त्ववशोहेमकारंपंचमंयजेत् देवतायावशोहेशरीरंजायतेध्रु
वं एवंमंत्रंप्रवक्ष्यामिश्रानंदपटलेस्थितं कालीछिन्नादिविद्याच
त्रिपुराद्यारमयीसदा तदासिद्धिमंत्रस्यापिप्रमथ्याविफलंसदा
शुद्धध्यानेनतःकृत्वाहृदिमध्येनिरीक्षणं प्रथमंकामिनींध्यात्वा
प्रफुल्लांतदनंतरं प्रफुल्लाध्यानमात्रेणजायतेदेवविग्रहं प्रफु
ल्लाज्ञायतेदेवियस्याःशुद्धदेवता तदिहंभावयेद्देविमंत्रोक्तध्या
नवर्त्मना देवतायाःशरीरंचबीजाद्युत्पद्यतेध्रुवं मंत्रस्यप्रथमा
द्बीजाज्जायतेनगनंदिनि पंचाशन्मातृकायासासर्वायुवतिरूपि
णी तस्माद्युवतीदेहाज्जायतेकुलविग्रहं रामःपद्मपलाशाक्षः
प्रफुल्लोज्जायतेध्रुवं बीजाद्युत्पद्यतेदेविपरंब्रह्मसनातनः बीज
संयोगमात्रेणशब्दब्रह्मसनातनः अपरंकंप्रवक्ष्यामिरहस्यंपरा
मातृकं पंचाशद्वर्णसंकेतंपंचाशतत्त्वमद्भुतं वर्णतत्त्वंविनादे
विप्रजपेद्यदिकोटिधा सर्वंतस्यवृथादेविहानिस्तस्यपदेपदे
हृत्पद्मेद्वादशदलेवराटोपरिकामिनीं ध्यात्वाप्रयत्नतोदेविन।

काम
धे॰
तं॰
२॰

ऊर्ध्वे वर्णभावनं अकारादिक्षकारान्तं त्रिकोणमध्यमंडले अनुलो
मविलोमेन कामिन्या गर्भपंजरे एकैकं भावयेद्देवि शक्तिवर्गेण च
करयुक् सर्वासां देवदेवीनां ककारं स्वरसंजितं ध्यात्वा प्रयत्नतो दे
वि अनुलोमविलोमतः पंचाशन्मन्त्रसंकेतं पंचाशद्वर्णमेव हि यः
करोति नरो ज्ञात्वा शीघ्रं विद्या प्रसीदति किमसाध्यं वरारोहे यस्मै
विद्या प्रसीदति षट्चक्रे परमेशानि रहस्यं स्थानमुत्तमं सहस्रारे
गुरोः पादपद्मं ध्यात्वा प्रयत्नतः पंचाशद्वर्णसंकेतं यः कुर्यान्मान।
वः प्रिये केशवं वशयेद्देवि रहस्येनापि नाक्षवं मोहयेद्ब्रह्म चलापां।
गि रुद्रं कालानलप्रभं सर्वं चराचरं विश्वं सहसा मोहमानयेत् प
तनेकस्थितं देवि वर्णमोहनमुत्तमं अन्यानां मोहनं तत्त्वं प्रजपेद्यदि
पार्वति न तस्य लोका गंधर्वाश्च वैरभावं व्रजन्ति वै अत्यन्तरमयं देवि
कथितं वर्णमोहनं अन्यानां मोहनेन तत्त्वं यः कुर्याद्रमोहनं सर्वं त
स्य स्यादेवि नान्यथा न कदाचन एतन्मन्त्रप्रभावाद्धि प्रविशन्सिद्धि
मान्नुयात् गर्भमध्ये जपेन्मंत्रं अनुलोमविलोमतः जपित्वा वर्णमे।
कं च तत्स्थानमानयेत्ततः पुनर्वर्णसमारोप्य कामिनीगर्भमध्यतः
अनुपदत्तं देवि वह्निबिंदुसमन्वितं पंचाशद्दत्तं चैव भावयेद्बुधः।
चक्रयुक् अनेन विधिना देवि यो जपेन्मंत्रमुत्तमं तस्य पीठं भवेत्सि
द्धिरन्यथा विफला भवेत् संभावलिखितं देवि यथा भवति अन्तरं

ततदेववरारोहेजपपूजानिरर्थके विशेषमंत्रंवक्ष्यामिश्रात्वं
दपटलेस्थितं मंत्रश्रीमोहनेनामपंचाशद्वर्णसंज्ञकं ज्ञात्वायः
ऊहतेदेवितस्यसिद्धिरहूरतः अन्यथाविफलंसर्वंरहस्यमफ
लेनहि इतिश्रीकामधेनुतंत्रेदेवदेवीसंवादेसप्तदशःपटलः १८
श्रीमहादेवउवाच अथातःसंप्रवक्ष्यामिरहस्यंपरमाद्भुतं अता
त्वावैस्तवेयांतितैरवंवरवर्णिनि एवंतत्वगतंदेवियोजपे
त्सारमेश्वरी नवतत्वमयीविद्यायदासपतिपार्वति तदेवस
हस्रासिद्धिर्जायतेसुरसुंदरि नवतत्वगतंमंत्रंज्ञात्वायःप्र
जपेत्सकृत् तदेवसहस्रादेविविस्तरलोमभवेद्ध्रुवं प्रथमं
कामिनीध्यात्वाहृत्पद्मेकमलेक्षणे उच्चरेत्प्रथमंवीजंकामि
नीतदनंतरं पुनर्वीजंद्वितीयंचउच्चरेद्धत्ततःसुधीः कामि
नीवततोध्यात्वातृतीयंवीजमुच्चरेत् अनेनविधिनादेविका
मिनीध्यानसंपुटं पुनर्ध्यानंककारस्यअनुलोमेनपार्वति अनु
लोमंयथादेविविलोमंचतथाऽऽशृणु एवंक्रमेणदेवेशियद
त्तरंकंप्रिये कृत्वायत्नाहरारोहेसर्वसिद्धीश्वरोभवेत् सर्वांसां
मंत्रवर्णानांध्यात्वाध्यात्वापृथक्पृथक् आद्यंतेकामिनीध्यात्वा।
शिवशक्तिमयोभवेत् अथवाचंचलापांगिहृत्पद्मेकमलान
ने आदौमध्येतथाचांतेवीजंदत्वाजपेत्प्रिये तदेवसहस्रादेविज्ञा

काम
ये॰
तं॰
११

येनेदेवविग्रहं सदानिद्रात्मकोमंत्रः कलिकालेचभारते रहस्या
नेनचार्वंगि निद्राभंगोनतदाभवेत् जपेदादौवरारोहे त्रिवारम
नुलोमतः विलोमेनत्रिवारंवध्यात्वाजन्माहृदांबुजे अथान्यत्सं
प्रवक्ष्यामिनिद्राभंगस्यलक्षणं प्रथमंकामिनीध्यात्वाग्रेतेवत
दनंतरं दशधाप्रजपेन्मंत्रं निद्राभंगायपार्वति ततस्तुप्रजपे।
देविप्रफुल्लंविश्वमोहनं रहस्यानेनचार्वंगिजायतेविश्ववि।
ग्रहं शंखचक्रधरंदेवंशुद्धनन्तात्मकेप्रिये पीतांबरधरंशांतं।
प्रसन्नंसुखपंकजं आजानुलंबितंबाहुवनमालाविराजितं
त्रिभंगललिताकारंबालचूडाविभूषितं श्रीवत्सकौस्तुभोद्दीप्त
जायतेविश्वविग्रहं भुवनानांस्वयंकुसंललितांजनविक्रणं
गोपीमंडलमध्यस्थंनानासुखमयंहरिं अथवाजायतेदेविन
स्मादीनाकुंचितस्मिते कामिनीध्यानमात्रेणदेवताजायतेध्रुवं
रहस्यमेतच्चार्वंगिकथितंवंलादिमध्यतः रहस्यानांचसर्वेषांसा
रमेतन्महेशायः अथान्यत्संप्रवक्ष्यामिरहस्यंपरमाद्भुतं ध्यात्वा
तुकामिनीनारींप्रथमंस्वादिमध्यतः तद्रूपंभावयेन्मंत्रंमन
सानयनेदिनि तद्रूपंभावयेद्देवंध्यानमार्गेणसुंदरि पुनः।
संकामिनीध्यानात्तस्मादाविर्भवेद्धरिः हरिस्वलक्षणंदेवि।
सर्वेषामेवनिर्मितं निद्राभंगंमहेशानिविद्यामंत्रमवेन्मरा

तस्मान्निद्रारहितं प्रजपेद्यदिपकदा जपान्कोटिगुणं भवेत्स
हस्रालभते अर्वं वामवाह्वोर्यदावाहस्तदा निद्रान्तरी मन्त्रः चल
तेव यदा वाह्वोर्दक्षिणो वरवर्णिनि तदैव वै वलापांगिन्यकं।
निद्रः सदा मन्त्रः अतएव वरारोहे सम्यङ्निद्रं जपेत्सुधीः श्री
देव्युवाच पूजाकाले महादेव यदि निद्रान्तरो भवेत् तत्कथं
सिध्यति मंत्रः किंकर्त्तव्यं तदा प्रभो प्रजपेत्केन विधिना तज्ज
पेद्वावद प्रभो श्रीमहादेव उवाच रहस्यमंत्रं वक्ष्यामि श्रानंद।
पटलेस्थितं द्वादशार्णमयं मंत्रं निद्राभंगस्य दीपनं रहस्य
मंत्रवांवेगि प्रत्तान्वा विफलं भवेत् इति श्रीकामधेनु विरचि
ते देवदेवीसंवादे अष्टादशः पटलः १८ श्रीमहादेव उवाच
संदेहो नैव कर्त्तव्यः पूजाकाले शुचिस्मिते सहस्रा कामिनी
ध्यात्वा तुरीयकूटमुच्चरेत् तदैव सहसा देवि तत्क्षणं निद्रा भवेन्म
न्त्रः प्रजपेत्पृशया देवि हृदये मनसापि वा पूजाकाले महेशा
नि संतजेद्यदि दक्षिणं प्रायश्चित्तं भवेत्तस्य मंत्रस्य वरवर्णिनि
प्रायश्चित्तमिदं देवि कृत्वा मंत्रं जपेद्यदि किं तस्य दक्षिणो वाहः।
तस्य निद्रान्तरेण किं रहस्यमंत्रं वा वेगि पूजाकाले विनिर्णयं
रहस्यमेतत्वावेगि सर्वनिद्रा सुमंगले वामवाहो यदा वायुर्यदा
वदक्षिणवाहः रहस्यमेतत्वावेगितु स्मात्तत्प्रजपेन्मंत्रं तदे

वत्सकनिद्रासाविद्यामंत्रंवनान्यथा योगनिद्रामयीविद्यायो
गनिद्रामयोमनुः विशेषमंत्रंवरप्यामिश्चानेदपटलेस्थितं श्र
ष्टात्तरीमहाविद्यांदीपनीमोक्षरूपिणी सर्वासिद्धिमयोभूत्वा
रहस्यफलमाप्नुयात् प्रजेपद्यदिनिद्रायांकिंतस्यजपपूजने र
हस्यानेनवार्वैगिनिद्रांतस्यकासनातनी सप्तग्राममध्यमार्गेषुसं
स्थिताब्रह्मरूपिणी रहस्यमेनत्सार्वैगिश्रुत्वावायोजपेन्मंत्रं
तस्यपापमहंवक्ष्येसावधानवधारय मूढेणलिखितंदेविपट
लेयत्प्रपठ्यते यंयंनरकमाप्नोतितंतंशृणुमिमानवाः द्वा
त्रिंशत्कोटिमध्येतुनरकेषुक्रमेणहि कोटिवर्षाण्यसमादायप
च्यंतेमनुजाधमाः विश्वासात्त्रियोवापिवैश्योवानगनंदिनि
पचयन्नरकेघोरेमूढस्यलिखितात्प्रिये तस्मान्मूढलिखितंप
टलंनजपेत्सुधीः तस्मात्सावरूपकंदेविकामिनीध्यानमुच्चरेत्
ततःसिद्धोभवेद्देविविद्यामंत्रेणचान्यथा कामिनीध्यानमात्रेण
सर्वसिद्धिमयोभवेत् एकेनैवकृतार्थःस्याद्बहुभिःकिमुपासते
तवभक्तामयाख्यातंयज्ञोप्यंभुवनत्रये कामधेनुमिदंतत्वाय
दिसर्जंसमाचरेत् सफलासाभवेत्सर्वाजपंवसफलंसदा अन
थाश्रेत्तवरीत्तासर्जाचक्षेत्तवत्सदा प्रथमंकामिनीध्यानाजप
सर्जंसमाचरेत् कामधेनोःफलंलब्ध्वासदाशिवमयोभवेत्

विश्वरूपी स एव स्यान्महामाया स एव हि शिवमंत्रे विष्णुमंत्रे शक्ति
मंत्रेषु विस्मिते कामधेनुमिदं मंत्रे प्रशस्तं स्मरपूजिते एतन्ने का।
थितं देवि सारात्सारं परात्परं यत्कृत्वा साधको याति इहलोभं मोत
मंदिरं विशेषमंत्रं वक्ष्यामि विद्यां श्रीकामरूपिणीं अस्तावा
कामिनीध्याने सहस्राब्धं थ्यंतामियात् तध्याने चंचलापा
गिश्वानन्दपटले स्थितं तस्मादवश्यं जपमवं सततं काम
दीपनी इति श्रीकामधेनुतंत्रे देवदेवीसम्वादे ऊनविंशः
पटलः श्रीदेव्युवाच मंत्रसमर्पणं तत्त्वं कथ्यतां देवपूजि
तं कस्मै समर्पयेन्मंत्रं वद देवगुरात्तव अर्पयेन्मंत्रतेजा
सि देवे पापादि मूलहृक् निस्तेजः साधके देव न दैवसरू
साभवेत् किं जप्येन च पूजायां पुरश्चर्ये च किं पुनः तन्मे
वद महाभाग कृपया परमेश्वर श्रीमहादेव उवाच सा
प्रष्टं त्वया भद्रे अधुना कथयामि ते जपित्वा चंचलायां
गिध्यायेत् परमकामिनीं मंत्रवर्णी वरारोहे कामिनी
गजगह्वरे चन्द्रबिन्दुयुतं कृत्वा एकैकं दशधा जपेत्
अनुलोमे यथा देवि विलोमेन तथा कुरु अतः परं वरारो
हे स्तात्वान्तु कामिनीपरां वियद्ब्रह्म महेशानि कामिनी
दशधा जपेत् कामिनीगर्भमध्ये तु वियद्वह्नियुतं प्रिये
प्रजपेद्दशधा भक्त्या वीजतत्त्वं तदा भवेत् ततस्तु कामि

नीतत्त्वंललाटेपरिचिंतयेत् एवंचमातृकास्थानेकामिनी
भावयेत्प्रिये पंचाशन्मातृकास्थानेप्रजपेन्मातृकामन्तु
वीजस्यज्योतिःपुंजेषुकामिनीसत्वरंकुरु दशधाप्रजपे
द्देविकामिनीवीजमुत्तमं कामिनीगर्भमध्येतुज्योतिस्त
त्त्वंजपंकुरु ज्योतिस्तत्त्वंवरारोहेस्वयंजीवःसनातनः
कामिनीजीवतत्त्वंचकृत्वावैसाधकःसुधीः सहस्रारेम
हापद्मेसंस्थाप्यकामिनीपरां गुह्यातिगुह्यगृह्णीत्वमि
तिमंत्रेणमंत्रवित् देवस्यदक्षिणेहस्तेवाह्यपूजादिचा
र्पयेत् देव्यावामेवरारोहेसमर्प्यफलभाग्भवेत् जपस्य
सर्वंतेजोसिदेवहस्तेयदिप्रिये समर्प्यपरमेशानितेज
स्साधकोभवेत् किंतस्यपूजनेभद्रेकिंजापेनचरान
ने यत्किंचिद्दीयतेदेविसर्वंब्रह्मणिलीयते विद्यामंत्रं
जपेद्देवितत्तेजउपजायते जीवतत्त्वंविनादेविदेवहस्ते
कदाचन नार्पयेत्त्वंचलायोगिदेव्याहस्तेविशेषतः तस्मा
त्प्रयत्नतोदेविजीवतत्त्वंकुरुध्रुवं जीवतत्त्वंविनादेवियद्दे
वेसमर्पयेत् जपंचविफलंदेविपूजाचविफलाभवेत्
गन्धपुष्पादिकंयद्दद्यात्सर्वंदेवेसमर्पयेत् जपतत्त्वंवरा
रोहेसर्वंतेजोमयंतथा यदितेजोवरारोहेदेव्यैदेवायस
र्पयेत् यत्तेजःसततंजीवःकथंसिद्धिःप्रजायते यस्ते

जन्मार्पयेद्देवि पुनरागमनं प्रिये दुर्ल्लभं चंचलापांगि
तन्मंत्रजः साधकस्य च हृष्यामयं वरारोहे कृतेनरपाम
रः समर्पणमविज्ञाय प्रजपेद्यदि कोटिवा देवता
तेजमध्ये तु तत्तेजो पविशेत्तु प्रिये भावयेद्धृदयं ते
नयथा सर्व्वस्वसंपुटं एतत्ते कथितं देवि जीवनं त्वे
तदुर्ल्लभं यत्कृत्वा साधको याति दुर्ल्लभं ब्रह्मविग्र
हं श्रुत्वा तंत्रमिदं देवि रहस्यफलमाप्नुयात् तंत्रमे
तद्वरारोहे पठनाद्यात् साधकः प्रिये इतिश्रीकामधे
नुतंत्रे देवदेवीसम्वादे विंशातितमः पटलः ॥
श्रीमहादेव उवाच चन्द्रसूर्य्योपरागे च प्रजपेद्यया
दे कामिनी तदैव सहसा सिद्धिर्ज्जायते नात्र संशयः
प्रथमं कामिनीजन्मा सविद्याः प्रजपेद्यदि तत्तत्त्व
कामिनीजन्मा सर्व्वसिद्धीश्वरो भवेत् अज्ञात्वा कामिनी
तत्त्वं न जपेद्ग्रहणे प्रिये न जपेत्तु ग्रहणे भद्रे अज्ञा
नाद्यदि मूढधीः सर्व्वं तस्य हणादेवि पूर्व्वधर्म्मा विन
श्यति चन्द्रपर्व्व सूर्य्यपर्व्व न विचार्य्यं कदाचन सूर्य्य
पर्व्व वरारोहे न पश्येद्यदि पामरः अज्ञात्वा तत्परो य
मीः पूर्व्वधर्म्मो विनश्यति न पश्येद्यदि अज्ञानात्स

काम. यं. तं. २४

वीरिष्टमवाप्नुयात् सर्व्वारिष्टमयः सोपि सर्व्वपापमयः
सदा तस्मादवश्यं कर्त्तव्यं चन्द्रपर्व्वनिरीक्षणं सूर्य्यपर्व्व
तथा देवि निरीक्ष्य मोक्षमाप्नुयात् अज्ञात्वा यदि मूढात्मा
राहुपादिगणैः प्रिये विचार्य्यं चंचलापांगि न पश्येद्ग्र
हणं यदि पूर्व्वपूर्व्वार्ज्जितं पुण्यं तत्क्षणादेव नश्यति
चन्द्रसूर्य्योपरागं च तस्माद्यत्नान्निरीक्षयेत् किन्तस्य
कामिनी भद्रे रम्याति च पुनस्तु किं ग्रासादिमुक्तिपर्य्यन्तं
जप्यासि धीश्वरो भवेत् न जपेद्यदि चार्व्वांगि रौरवं नर
कं व्रजेत् तत्कालं चंचलापांगि परंब्रह्मस्वरूपिणि
तस्मिन्काले वरारोहे ब्रह्मादिजातिभेदतः आचण्डा
लप्रमन्तयोर्द्विजतुल्या भवेत्ति हि द्विजालङ्चंचलापांगि
साक्षाद्ब्रह्म न संशयः तत्र काकगणना देवि चाण्डाला
नौ वरानने तस्माद्यत्नेन कर्त्तव्यं चन्द्रपर्व्वनिरीक्षणं
चन्द्रकोटिगुणं देवि सूर्य्येदशाग्रगुणं भवेत् तत्र यद्यत्
कृतं कर्म्म जपहोमादिकं प्रिये अक्षयं तद्भवेद्देवि वचनं
मम निश्चितं राहुपादिगणैस्त्यक्ता यवनैर्दृश्यते यदि
यवनस्पर्शतथासिद्धिर्ज्ञायते पृथिवीतले दीक्षितोऽदी
क्षितो वापि हृष्टास्नानं समाचरेत् तदेवमक्षयं स्नानंगं

गास्नानेभवेत्प्रिये विष्ठाकूपस्थितंतोयंगंगोदकसमं
स्मृतं ग्रग्रस्तेग्रहणेकालेनान्यथावचनंमम षष्ठमा
सांधिकोवालोयदिस्यात्वरवर्णिनि ग्रहणेचन्द्रसूर्य
स्यतस्यस्नानेप्रशस्यते अकृत्वास्नानदानेचसहस्रान
रकंव्रजेत् सभ्रष्टःसचपापिष्ठःसहस्रांशुकरःप्रिये त
स्नात्वमुदकेदेविमूत्रंपूर्णानिवत्प्रिये ज्ञायतेनात्र
सन्देहोममवाक्यंवरानने ब्राह्मणःब्राह्मणोवापिचन्द्र
पर्वणिपार्वति चाण्डालप्रभृतिःसर्वोब्रह्मगोत्रेप्रवर्त्ते
ते ब्रह्मेतिनामसर्वेषांराघ्वादिगणनेकृतः तस्मात्त
चेचलायांगिसंकल्पनेवकारयेत् मासपक्षतिथीनांच
निमित्तानिचपार्वति नविचार्य्यंवरारोहेग्रहणेचन्द्रसू
र्य्ययोः ग्रासादिमोक्षकालेतुकुतोमासःकुतस्तिथिः
सकालःपरमंब्रह्मसर्वेषामक्षिगोचरं तत्कथंपाम
रोलोकोराघ्वादिगणनंप्रिये उपरागंपरित्यज्ययश्चा
न्यपरिचिंतयेत् सभवेद्रौरवेमग्नोब्रह्मणश्चानुमान
तः रौरवात्पुनरागत्यपापयोनौप्रवर्त्तते निष्कृति
र्नास्तिवार्वंगितस्यापिचकदाचन तस्मात्सर्वंपरित्यज्य
चन्द्रपर्वनिरीक्षणं चन्द्रपर्वयथादेविसूर्यपर्वेतथा

काम· धे·तं· २५

ष्ठिये तत्रछायादिकंयत्कार्यविद्यां मंत्रं जपेत् ष्ठिये अन्य
थानरकंयातिपितृणसप्तनयत्पथः अपरैकं प्रवक्ष्यामि
रहस्यं शृणुसुन्दरि अकारादिक्षकारांतं प्रतिपद्मे निरी
क्षयेत् ततस्तु प्रजपेत् शून्यं चन्द्रविन्दुकसंयुतं ततस्तु
हृदयाकाशे शून्ये ज्योतिर्मये ध्रुव अनुलोमविलोमेन
मातृकां प्रजपेत् सुधीः ततस्तु साधकश्रेष्ठो वराद्योप
रिमातृकां पद्मवीजे यथा देवि वर्णवीजं प्रभावयेत्
चन्द्रबीजं पुटेकृत्वा जपेद्वर्णं प्रसन्नधीः अनुलोम
विलोमेन जत्वामृतमयोभवेत् केवलं कामिनीध्या
त्वा प्रफुल्लवदनांतरं बीजाडन् पश्यते देवो देवी वाक
मलेक्षणे ततस्तु देवतां ध्यात्वा निरीक्ष्य देवविग्रहं
इति श्रीकामधेनुतंत्रे महादेवमहादेवीसम्वादे प
कविंशतितमः पटलः समाप्तः ॥ शुभं मस्तु

कंकालमालिनी

कंका
लमा·
तं·
१

ॐश्रीगणेशाय नमः। ॐ नमः श्रीगुरवे। भैरव्युवाच।
त्रिपुरेश महेशान पार्वतीप्राणवल्लभ। जगद्वन्द्य शू
लपाने वर्णानां कारणं वद। श्रीभैरव उवाच। कथ
यामि वरारोहे वर्णानां भेदमुत्तमं। नप्रकाश्यं म
हादेवि निर्गुणं त्वं मम प्रिये। तच्छृणुष्व स्वरूपेण
महायौवनगर्विते। शब्दब्रह्मस्वरूपं तद् आदिक्षां
तं जगत्प्रभुः। विद्युज्जिह्वा करालास्या गर्जिनी धू
म्रभैरवी। कालरात्रिर्विदारी च महारौद्री भयंकरी।
संहारिणी करालिनी ऊर्द्ध्वकेश्युग्रभैरवी। भीमाक्षी
डाकिनी रुद्रडाकिनी चण्डिकेति च। एते वर्णाः स्व
राः ज्ञेयाः कौलिनी व्यंजनाच्छृणु। क्रोधीशो वामनश्च
ण्डो विकार्युन्मत्तभैरवः। ज्वालामुखो रक्तदंष्ट्रोऽसि
तांगो वड़वामुखः। विद्युन्मुखो महाज्वालः कपाली
भीषणो रुरुः। संहारी भैरवो दण्डी वलिभुगुग्रशूल
धृक्। सिंहनादी कपर्दी च करालाग्निर्भयंकरः। व
हुरूपी महाकालो जीवात्मा क्षतजोक्षितः। वल
भेदी रक्तपश्च चण्डीशोज्ज्वलनध्वजः। वृषध्वजो
व्योमवक्त्र स्त्रैलोक्यग्रसनात्मकः। एते च व्यंजना
ज्ञेयाः कादिक्षान्ताः क्रमादिताः। अकारादिक्षकारा
न्ता वर्णास्तु शिवशक्तयः। पंचाशच्च इमे वर्णा ब्र

स्वरूपाः सनातनाः। येषां ज्ञानं विना वामे सिद्धिर्न
स्याद् गुरुसन्तति। ते वर्णसागराः प्रोक्ता गुणत्रयम
याः शुभे। विद्युज्जिह्वामुखं कृत्वा चण्डकान्तं नगात्म
जे। सत्त्वगुणमया वर्णा रजोगुणमयान् शृणु। क्रो
धीशाद् दण्डपर्यन्ता व्यंजना राजसाः स्मृताः। वलि
भुग्वर्णमारभ्य त्रैलोक्यग्रसनावधि। ज्ञेयास्तमःस्व
रूपास्ते तेभ्यो जातान् शृणु प्रिये। गुशब्दश्चान्धकारः
स्यादुशब्दस्तन्निरोधकृत्। ग्रंथकारविरोधित्वाद् गु
रुरित्यभिधीयते। गकारः सिद्धिदः प्रोक्तो रकारः पा
पहारकः। उकारस्तु भवेद्विष्णुस्त्रितयात्मा गुरुः
स्वयम्। आदावसौ जायते च शब्दब्रह्म सनातनः।
वह्निजिह्वा कालरात्र्या रुद्रडाकिन्यलंकृता। विषवी
जं श्रुतिमुखं ध्रुवं हालाहलं प्रिये। ॐ चण्डीशः क्षत
जारूढो धूम्रभैरव्यलंकृतः। नादविन्दुसमायुक्तं ल
क्ष्मीबीजं प्रकीर्तितं। श्रीं। क्रोधीशं क्षतजारूढं धू
म्रभैरव्यलंकृतं। नादविन्दुयुतं देवि नामबीजं प्र
कीर्तितं। क्रौं। क्रोधीशो वलभद्र (वलिभुग) धूम्रभै
रवी नादविन्दुभिः। त्रिमूर्तिर्मन्मथः कामबीजं त्रै
लोक्यमोहनं। क्लीं। क्षतजस्थो व्योमवक्त्रो धूम्रभैर
व्यलंकृतः। नादविन्दुसंशोभासं मायालज्जाद्वये

कं.का
ल.मा.
तं.
२

स्मृतं। ह्रीं। व्योमास्यं च विदारीस्थं नादविन्दुविराजितं।
सर्वकाले क्रोधवीजं जानीहि वीरवन्दिते हूँ। व्योमा
स्यः कालरात्र्यास्थो वर्म्मविन्दिन्दुसंयुतः। कथितं कव
चं वीजं कुलाचारप्रिये ऽमले। हूँ। व्योमास्यं त्वनजा
रूढं डाकिन्या नादविन्दुभिः। ज्योतिर्मन्त्रं समाख्यातं
महापातकनाशनं। ह्रौं। नादविन्दुसमायुक्तो समा
दायोग्रभैरवी। भौतिकं वाग्भवं वीजं विद्धि सारस्व
तं प्रिये। ऐं। प्रलयाग्निमहाजालः ख्यात ग्रस्त्रमनुः
शिवे। रक्तक्रोधीशभीमाख्यो ऽङ्कुशो ऽयं नादविन्दु
मान्। क्रौं। ठिठः शिवो वह्निजाया स्वाहा ज्वलनवल्ल
भा। स्वाहा। संयुक्तं धूम्रभैरव्या रक्तस्थं वलिभोजनं।
नादविन्दुसमायुक्तं किंकिनीवीजमन्त्रमं। ह्रीं। नाद
विन्दुसमायुक्तं रक्तस्थं वलिभोजनं। करालास्यासनो
पेतं विशिकाख्यं महामनुं। हूं। विदार्य्यानेदितोश
स्य वलिभुक् त्वनजोदितः। नादविन्दुसमायुक्तो वि
ज्ञेयः पिशिताशनः। धूम्रोज्ज्वलकरालाग्नि ऊर्द्धके
शीन्दुविन्दुभिः। युगान्तकारकं वीजं वीरपत्निप्रका
शितं। संहारिण्या स्थितं चोर्द्धकेशिनं त्व कपर्द्दिनं।
नादविन्दुसमायुक्तं बीजं वैतालिकं स्मृतं। सनाद
विन्दुक्रोधीशं ग्रस्ते संहारिणीस्थितं। कम्पिनी वीज

2

मिसृक्तं चण्डिकाख्यं मनोहरं। कपर्द्दिनं समादाय
ततजोद्दितसंस्थितं। संयुक्तं प्रमत्तभैरव्याख्याङ्को॰
र्यनादविन्दुमान्। प्रीं। कपालीद्वयमादाय महाका
लेन मण्डितं। सनादल्लनमिस्तृक्तं चण्डिकाख्यं प
योधरं। ठं ठं। प्रलयाग्निशिखि नोधूमध्वजोग्रधे स
विन्दुमान् संयुक्तो प्रमत्तभैरव्या स्मृता फेत् कारिणी
प्रिये। स्फों। ततजस्थंव्योमवक्त्रं विन्दुखण्डेन्दुलं
कृतं। एवं ध्यानमिति विख्याते ग्रासिनी कालरात्रिशु
क्। ह्रूँ। ततजोद्दितमारूढं नादविन्दुसमन्वितं।
विदारीभूषितं देवि वीजं वैवस्वतात्मकं। इति द
क्षिणाम्नाये सार्द्धलक्षग्रंथे कंकालमालिनीतंत्रे प्र
थमः पटलः १। श्रीपार्वत्युवाच। देवदेव महादेव
नीलकंठ तपोधन। योनिमुद्रा महादेव तत्त्वत्रयं
परात्परं। एतदेव महादेव कथ्यतां मे पिनाकधृ
क्। ईश्वर उवाच। शृणु वक्ष्यामि देवेशि दासोऽहं
तव सुव्रते। अतिरहस्य महत्पुण्यं तत्त्वत्रयं वरा
नने। सारात्सारं परं गुह्यमतिगोप्यं सुनिश्चितम्।
शंकापि जायते देवि कथं तत् कथयाम्यहं। कथ
यामि महेशानि आज्ञया तव भाविनि। नचेत्तत् क
थ्यते देवि तव क्रोधः प्रजायते। तया क्रोधे कृते

देवि हानिःस्यान्मम कामिनि । मंत्रार्थं मंत्रचैतन्यं य
र्मार्थकामदं प्रिये । योनिमुद्रा महेशानि साक्षान्मो
क्षप्रसाधिनी । तव योनिर्महेशानि प्रियामम यथा
प्रिये । सततं परमेशानि दासोऽहं तवयोनिना तव
योनिप्रसादेन मृत्युं जित्वावरानने । मृत्युंजयोऽहं
देवेशि सततं कमलानने । तवयोनौ महेशानि ब्र
ह्माण्डं सचराचरं । तिष्ठंति सततं देवि ब्रह्माद्याश्च
दिवौकसः । मयूरस्य महेशानि पुच्छे कृत्वाच अद्भु
तं । योन्याकारं महेशानि दृष्ट्वाहृष्टः सुविस्मितः । शि
रेधृत्वा वरारोहे त्रैलोक्यं वशमानयेत् । तव यो
निं महेशानि भावयाम्यहर्निशं । तत्रैव दृष्टा ब्र
ह्माण्डं नान्यं पश्यामि कामिनि । कर्पूरपुलकोद्भूतं
तवयोनिपुरं परे । तव योनिर्महेशानि तत्वत्रयसु
पूजितं । रेतोरजःसमायुक्तं साक्षान्ममध्यमन्दिरं ।
नजाने किं कृतं कर्मकालिके कमलेक्षणे । तव यो
नौ महादेवि अनत्पव वरानने । योनिमुद्रां योनिबी
जं सततं परमेश्वरि । अहं मृत्युंजयो देवि योनिमु
द्राप्रसादतः । योनिबीजं महेशानि निगदामि शृ
णु प्रिये प्रथमे परमेशानि योगिनी हृदयोगिनी ।
उद्धृत्य वह्नियत्नेन वलवीजयुतं कुरु । विन्दुईचन्द्र

संयुक्तं वीजं त्रैलोक्यमोहनं। वध्वा तु योनिमुद्रां वै पूर्वोक्तक्रमतः प्रिये। योनिवीजं महेशानि अष्टोत्त रशतं जपेत्। अष्टोत्तरशतं जप्त्वा यत् फलं लभते प्रि ये। माहात्म्यं तस्य देवेशि वक्तुं कोवा क्षमो भवेत्। यः करोति प्रसन्नात्मा रहस्ये योनिरूपिणी। ब्रह्माण्ड पूजयेत्तेन ब्रह्माद्या स्त्रिदिवौकसः। तव योनिर्महे शानि परंब्रह्मस्वरूपिणी। तव योनिर्महेशानि भवस्य मोहिनी प्रिये। तव योनिर्महेशानि सिद्धि सूत्रेण वेष्टयेत्। सिद्धिसूत्रं महेशानि त्रिप्रकारं व रानने। ईड़ा च पिंगला चैव सुषुम्ना त्रितयं तथा। सदानन्दमयी योनिं नानासुखविलासिनी। शृंगाररस मये देवि नान्तं गच्छामि पार्वति। ममलिंगो महेशा नि भिनत्ति सकलं जगत्। तथापि परमेशानि नांतं गच्छामि कामिनि। तव योनिर्महेशानि न जाने की दृशी गतिं। तव योनिर्महेशानि आद्या प्रकृतिरू पिणी। सदाकुण्डलिनी योनिं महाकुण्डलिनी प रा। यः सदा परमेशानि योनिं दृष्ट्वा वरानने। जपे द्वीजं वरारोहे भगाख्यं भगरूपिणं। योनिं वध्वा म हेशानि भगवीजेन पार्वति। अष्टोत्तरशतं जप्त्वा ममतुल्यो भवेत् प्रिये। तव योनौ महेशानि रम

कंका
लमा॰
तं॰
४

णं यत्नतश्चरेत्। तस्य स्मरणमात्रेण ब्रह्मविष्णुशि
वात्मकः। स एव धनवान् वाग्मी वागीशसमतां
ब्रजेत्। श्रीदेव्युवाच। नीलकंठ महादेव रहस्यं
कृपया वद। यदि नो कथ्यते देव विमुंचामि तदा
तं। ईश्वर उवाच। शृणु पार्वति कृष्णांगि खंजनाक्षि
सुलोचने। गोपनीयं रहस्यं हि सर्वकामफलप्रदं।
तिस्रः कोट्यर्धकोटिश्च शरीरे नाडिका मताः। तासु
मध्ये दश प्रोक्तास्तासु तिस्रो व्यवस्थिताः। प्रधाना
मेरुदण्डाग्रे चन्द्रसूर्याग्निरूपिणी। मज्जयित्वा सु
षुम्नायां महे योगी सुरेश्वरि। षट्चक्रे परमेशानि
भावयेद् योनिरूपिणीं। प्रथमं परमेशानि आधा
रं चतुष्पत्रकं। वादिसांतैश्चतुर्वर्णैर्द्रुतहेमसमप्र
भं। तडित्कोटिप्रभाकारं स्थाने परमदुर्लभे। त
त्कर्णिकायां देवेशि त्रिकोणमतिसुन्दरं। इच्छा
ज्ञाने क्रियारूपं ब्रह्मविष्णुशिवात्मकं। मध्ये स्व
यम्भूलिंगं च कुण्डलीवेष्टितं सदा। त्रिकोणाद्ध्व
त देवेशि लेकारं चिन्तयेत्तथा। ब्रह्माणं तत्र संवि
न्त्य कामदेवं च चिन्तयेत्। वीजं तत्रैव निश्चिन्त्य
पानावादानमेव च। परे च गमनं पायौ त्रिसर्गेन
सिकामिति। प्राणं संचिन्त्य देवेशि महेशि प्राण

वल्लभे । डाकिनीं परमाराध्यां शक्तिं च भावयेत्ततः ।
एतानि गिरिजे मातः पृथ्वीं नीत्वा गणेश्वरिः । तन्म
ध्ये लिंगरूपं हि कुण्डलीवेष्टितं प्रिये । तत्र कुण्ड
लिनीं नित्यां परमानन्दरूपिणीं । तत्रस्थाने प्रकुर्वी
त सिद्धिकामो वरानने । कोटिवह्निप्रभाकारां परं
ब्रह्मस्वरूपिणीं । चतुर्भुजां त्रिनेत्रां च वराभयकरं
तथा । तथा च पुस्तकं वीणाधारिणीं सिंहवाहिनीं ।
गच्छेत्स्वाष्ठाने भीमां नानारूपधरां परां । पूर्वोक्तां
पृथिवीं यत्नाद्गन्धे नीत्वा महेश्वरि । आकृष्य प्राण
वेनैव जीवात्मानं नगेन्द्रजे । कुण्डलिन्या सह प्रेम
गन्धमादाय साधकः । सोऽहमिति मनुना देवि स्वा
धिष्ठाने प्रवेशयेत् । तत्पद्मं लिंगमूलस्थं सिन्दू
राभं च षड्दलं । स्फुरद्विद्रुमसंकाशैर्वादिनान्तैः सु
शोभितं । तत्कर्णिकायां वरुणं तत्रापि भावये
द्धरिं । युवानं राकिणीशक्तिं चिंतयित्वा वरानने ।
रसनेन्द्रियरूपस्थं जलं च कमलालसे । एतानि
गन्धं च शिवे रसे नीत्वा विनोदिनी । जीवात्मानं कु
ण्डलिनीं रसं च मणिपूरके । नीत्वा परमयोगेन त
त्पद्मं दिग्दलं प्रिये । नीलवर्णं तडिद्रूपं डादिफा
न्तैश्च मण्डितं । तत्कर्णिकायां स्वयोणि वह्निं सं

कं॰का॰ लमा॰ तं॰ ५

5

चिंत्यसाधकः। तत्ररुद्रःस्वयंकर्त्तासंहारेसकलस्यच
लाकिनीशक्तिसंयुक्तोभावयेत्तंमनोहरे। तत्रचद्व
रिन्द्रियंचकृत्वातेजोमयंयजेत्। एतानिरसंचसुभ
गेरूपेनीत्वामहाभगे। जीवात्मानंकुण्डलिनीरूपं
चानाहतेनयेत्। बंधूकपुष्पसंकाशेतत्रपद्मेद्वाद
शारके। कादिठांतैःस्फुरद्वर्णैःशोभितेहरवल्लभे।
तत्कर्णिकायांवायुंचजीवस्थाननिवासिनं। तत्र
योनिमण्डलेचबाणलिंगविराजिते। काकिनीश
क्तिसंयुक्तेतत्रवायोस्त्वगिन्द्रिये। एतानिरूपंचसंयो
ज्यस्वर्गेरमणकारिणि। जीवकुण्डलिनीस्पर्शंवि
शुद्धेस्थापयेत्ततः। धूम्रवर्णेकंठपद्मेषोडशस्वर
मण्डिते। तत्कर्णिकायामाकाशेशिवेचकारिणि
युते। वाचंश्रोत्रेचआकाशेसंस्थाप्यनगनन्दिनि। ए
तानिस्पर्शंशाब्देचनीत्वाशंकरिमत्प्रिये। जीवंकु
ण्डलिनींशब्दंचाज्ञापत्रेनिधापयेत्। नेत्रपद्मेशुक्ल
वर्णेद्विदलेहक्षभूषिते। तत्कर्णिकायांत्रिकोणे
चेट्बाणलिंगंचसंगतं। मनश्चात्रसदाभातिहाकि
नीशक्तिलांछितं। बुद्धिप्रकृत्यहंकारालक्षितंतेज
सापरं। जीवात्मानंकुण्डलिनींमनश्चापिमहेश्वरि।
सहस्रारेमहापद्मेमनश्चापिनियोजयेत्। सहस्रा

रंनित्यपद्मं शुक्लवर्णमधोमुखं । अकारादिक्षका
रान्तैःस्फुरद्वर्णैर्विराजितं । तत्कर्णिकायां देवेशि
अंतरात्मा ततो गुरुः । सूर्यस्य मण्डलं चैव चन्द्रमण्ड
लमेव च । ततो वायुर्महानादो ब्रह्मरन्ध्रं ततः स्मृतं ।
तस्मिन् रन्ध्रे विसर्गं च नित्यानन्दं निरंजनं । तदूर्ध्वं
शंखिनी देवी सृष्टिस्थित्यन्तकारिणी । तस्याधःस्था
च देवेशि चन्द्रमण्डलमध्यगं । त्रिकोणं तत्र संवि
द्याकैलासमत्र भावयेत् । इहस्थाने महादेवि स्थि
रचेतो विधाय च । जीवजीवी गतव्याधिर्न पुनर्ज
न्मसंभवः । अत्र नित्योदिता वृद्धिक्षयहीना अमा
कला । तन्मध्ये कुटिला निर्वाणाख्या सप्तदशी क
ला । निर्वाणाख्यान्तरगता वह्निरूपा निरोधिका ।
नादोऽव्यक्तस्तदुपरि कोट्यादित्यसमप्रभा । निर्वा
णशक्तिः परमा सर्वेषां योनिरूपिणी । अस्यां श
क्तौ शिवं ज्ञेयं निर्विकारं निरंजनं । अत्रैव कुण्डली
शक्तिर्मुद्राकारा सुरेश्वरि । पुनस्तेन प्रकारेण
गच्छेत्स्वाधारपंकजे । कथिता योनिमुद्रेयं मया ते
परमेश्वरि । विनायेन न सिद्धेन निहरेत् परमात्म
नः । नहि व्याप्तस्तथाशाभिलीलाभाभिर्महेश्वरि ।
तर्पयेद्देवतायोगी योगेनानेन साधकः । ततः सा

कं॰का॰
लमा॰
तं॰
९

6

कुण्डली शक्तिसिद्धिः स्याद् वर्णकोटिशतैरपि त
स्मात्त्वयापि गिरिजे गोपनीयं प्रयत्नतः । मंत्ररूपां
कुण्डलिनीं ध्यात्वा षट्चक्रमण्डले । कन्दमध्यात्
सुमध्यरंकुजंती सततोत्थिता । गच्छंती ब्रह्मरन्ध्रेण
प्रविशंती स्वकेतने । मूलाधारे चतो देवीं संस्थाप्य
वीरवन्दिते । चित्रिणीग्रथिता मालाजापे ब्रह्माण्ड
सुन्दरि । मुद्रोचैतन्ययोर्ज्ञाने वर्णानां ज्ञानमेव च ।
मंत्रार्थं कथितं देवि तव स्नेहात्प्रियंवदे । अस्य
ज्ञानं विना भद्रे सिद्धिर्न स्यात्सुलोचने । इति ते क
थितं देवि योनिक्रीडनमुत्तमे । श्रीईश्वर उवाच ।
सुरासुरजगद्वंद्य पार्वती भगमेवक । इदानीं श्रो
तुमिच्छामि योनेः कवचमुत्तमं । यद्धृत्वा पठना
त्सर्वाः शक्तयो वरदाः प्रिये । एतस्य कवचस्यापि
ऋषिश्च श्रीसदाशिवः । छंदो गायत्री देवता योनि
रूपा सनातनी । चतुर्वर्गेषु देवेशि विनियोगः प्र
कीर्त्तितः । ॐ मं मां मिं मीं मुं मूं में मैं मों मौं मं
मः दक्षपादं । मम शिरो रक्षतु स्वाहा । ॐ मं मां मिं
मीं मुं मूं में मैं मों मौं मं मः ॐ मां ॐ भ्रूकुटीं मम
रक्षतु स्वाहा मं मां । ॐ मं मां मिं मीं मुं मूं में मैं मों
मौं मं मः हृदयादि दक्षबाहुं रक्षतु । ॐ मं मां मिं

मी मुं मूं में मैं मों मौं मं मः ममहृदयादिवामबा
हुं रक्षन्तु । ऊँ मं मां मिं मीं मुं मूं में मैं मों मौं मं मः
दक्षयादं रक्षन्तु मम । ऊँ मं मां मिं मी मुं मूं में मैं
मों मौं मं मः । वामपादं रक्षन्तु ममसदास्वाहास्वा
हास्वाहा । ऊँ मं मां मिं मी मुं मूं में मैं मों मौं मं मः
मम हृदादिषुनासां रक्षन्तु स्वाहा । ऊँ मं मां मिं मी
मुं मूं में मैं मों मौं मं मः उपस्थं रक्षन्तु ममसदास्वा
हा । ऊँ मं मां मिं मी मुं मूं में मैं मों मौं मं मः इदं
हि योनिकवचं रहस्यं परमाद्भुतं । अज्ञात्वा यो
जपेन्मंत्रं सर्वं निष्फलतां ब्रजेत् । रहस्यं परमं दि
व्यं सावधानावधारय । मूलाधारे महेशानि जपे
दयस्तु वरानने । मूलाधारे महेशानि वरारोहेऽ
न्नरात्मनि । प्रतिचक्रे महेशानि पठेद्योनिं सना
तनी । चन्द्रसूर्यौ परागे च पठेद्धा कवचं प्रिये ।
स्वनारीं रमयेन्नयस्तु परनारीमथापि वा । कव
चस्य प्रसादेन योनिमुद्रा हि सिध्यति । इदं हि क
वचं देवि पठित्वा कमलानने । मैथुनं महदा
ख्यानं त्वया सह मया कृतं । कवचस्य प्रसादेन
जना यान्ति परां गतिं । भूर्जपत्रे समालिख्य स्वय
म्भूकुसुमेन तु । शुक्लेन कुसुमेनापि रोचनाल

कंकालमा॰ तं॰ ७

क्रकेनच। स्वर्णस्थां गुटिकां कृत्वा धारयेद्धृदयस्तमानः। इहलोके परत्रे च स एव श्रीसदाशिवः। अष्टोत्तरशतं चास्य प्रपठेत्सिद्धिवाञ्छया। किमत्र बहुनोक्तेन अस्मात्परतरो न हि। नमो योन्यै नमो योन्यै कुण्डलिन्यै नमो नमः। इति दक्षिणाम्नाये साईलक्षग्रंथे कंकालमालिनीतंत्रे योनिमुद्रादिकथने द्वितीयः पटलः २ श्रीदेव्युवाच। इदानीं श्रोतुमिच्छामि गुरुपूजनमुत्तमं श्रीईश्वरउवाच कथयामि महादेवि अप्रकाश्यं वरानने। निर्गुणं च परं ब्रह्म गुरुरित्यक्षरद्वयं। महामंत्रं महेशानि गोपनीयं परात्परं। तत्रध्यानं प्रवक्ष्यामि शृणु पार्वति सादरं। सहस्रदलपद्मस्थमंतरात्मानमुज्ज्वलं। तस्योपरि नादबिन्दोर्मध्ये सिंहासनोज्ज्वले। चिन्तयेन्निजगुरुं नित्यं रजताचलसन्निभं। वीरासनसमासीनं मुद्राभरणभूषितं। शुभ्रमाल्याम्बरधरं वरदाभयपाणिनं। वामोरुशक्तिसहितं कारुण्येनावलोकितं। प्रियया सव्यहस्तेन धृतचारुकलेवरं। वामेनोत्पलधारिण्या रक्ताभरणभूषया। ज्ञानानन्दसमायुक्तं स्मरेत्तन्नामपूर्वकं। मानसैरुपचारैश्च संपूज्य कल्पयेत्सुधीः गन्धं भूम्यात्मकं दद्यात्

भावपुष्पैस्ततः परं । धूपं वाय्वात्मकं देवि तेजसा दी
पमेव च । नैवेद्यममृतं दद्यात् पानीयं वरुणात्मकं ।
अम्बरं मुकुटं दद्याद्वस्त्रं चैव मम प्रिये । चामरं पादु
काछत्रं तथालंकारभूषणैः । तत्तन्मुद्राविधानेन संपू
ज्याथ गुरुं यजेत् । यथाशक्ति जपं कृत्वा समर्प्य कव
चं पठेत् । इति ते कथितं सम्यग् गुरुपूजनमुत्तमं ।
श्रीदेव्युवाच । भूतनाथ महादेव कवचं तस्य मे वद ।
श्रीईश्वर उवाच । अथ ते कथयामी श्रीकवचं मोक्षदा
यकं । यस्य ज्ञानं विना देवि न सिद्धिर्न च सद्गतिः ।
ब्रह्मादयोऽपि गिरिजे सर्वत्र जयिनः स्मृताः । अस्य श्री
सादात् सकला वेदागमपुरःसराः । कवचस्यास्य दे
वेशि ऋषिर्विष्णुरुदाहृतः । छन्दो विराड् देवता च
गुरुदेवः स्वयं शिवः । चतुर्वर्गे ज्ञानमार्गे विनियो
गः प्रकीर्त्तितः । सहस्रारे महापद्मे कर्पूरधवलो गु
रुः । वामोरुगतशक्तिर्यः सर्वतः परिरक्षतु । पर
माख्यो गुरुः पातु शिरसं मम वल्लभे । परापराख्यो
नासां मे परमेष्ठिर्मुखं मम । कंठं मम सदा पातु प्र
ह्लादानन्दनाथकः । बाहू द्वौ सनकानन्दः कुमारा
नन्दनाथकः । वशिष्ठनन्दनाथश्च हृदयं पातु सर्व
दा । क्रोधानन्दः कटिं पातु सुखानन्दः पदं मम ध्या

कं॰का
लमा॰
तं॰
८

नानन्दस्य सर्वांगं वोथानन्दस्य कानने । सर्वेत्र गुरवः पा
त्र सर्वे ईश्वररूपिणः । इति ते कथितं भद्रे कवचं प
रमं शिवे । भक्तिहीने दुराचारे दद्यान्मृत्युमवाप्नुयात्
स्वस्यैव पठनाद्देवि धारणाच्छ्रवणात्प्रिये । मंत्राः
सिद्धाश्च जायंते किमन्यत्कथयामि ते । कंठे वा दक्षि
णे बाहौ शिखायां वीरवन्दिते । धारणान्नाशयेत्पा
पं गंगायां कलुषं यथा । इदं कवचमज्ञात्वा यदि मंत्रं
जपेत्प्रिये । तत्सर्वं निष्फलं कृत्वा गुरुर्याति सुनि
श्चितं । शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन । श्री
पार्वत्युवाच लोकेश कथ्यतां देव गुरुगीता मयि प्र
भो । श्रीशिव उवाच । शृणु नारि प्रवक्ष्यामि गीतां
ब्रह्ममयीं परां । गुरुस्त्वं सर्वशास्त्राणामहमेव प्र
काशकः । त्वमेव गुरुरूपेण लोकानां त्राणकारि
णी । गया गंगा काशिका च त्वमेव सकलं जगत् । का
वेरी यमुना रेवा करतोया सरस्वती चन्द्रभागा गोम
ती च त्वमेव कुलपालिका । ब्रह्माण्डं सकलं देवि को
टिब्रह्माण्डमेव च । न हि ते वक्तुमर्हामि क्रियाजाले
महेश्वरि । उक्त्वा उक्त्वा भावयित्वा भित्त्वा कोऽहं नगा
त्मजे । कथं त्वं जननी भूत्वा वपुष्यं मम देहिनां । त
व चक्रं महेशानि प्रतीतं परमात्मनः । इति ते कथि

नागीताश्रुरुदेवस्य ब्रह्मणः। संदेपेणमहेशानि
प्रभुरेवश्रुरुःस्वयं। जगतांसमस्तमस्थ्येयंगुरुस्थेयो
हिकेवलं। तेनोपयित्वादेवेशिननिभिस्ततिभिस्त
था। नानाविधद्रव्यदानैःसिद्धिःस्यात्साधकोत्तमः
इतिश्रीदक्षिणाम्नायेसार्द्धलक्षग्रंथेकंकालमालि
नीतंत्रेश्रीगुरुपूजनकवचेगीताकथनंनामतृती
यपटलः ३ श्रीपार्वत्युवाच। कथयस्वविरूपाक्षम
हाकालीमंत्रंप्रभो श्रीईश्वरउवाच अथातःसंप्रव
क्ष्यामिमहाकालीमंत्रंप्रिये। यस्यविज्ञानमात्रेण
सर्वसिद्धीश्वरोभवेत्। श्रियाविष्णुःसमःकांत्यास
न्मुखेनसमःस्मरः। शौर्येणश्चविनातुल्योवलेन
पवनोपमः। वागीश्वरःसमोवाचिधनेनधनपः
स्वयं। सार्वज्ञेशम्भुनातुल्योदानेदधीचिनासमः।
आज्ञयादेवराजोऽसौब्राह्मण्येनप्रजापतिः भृगो
रिवतपस्वीचचन्द्रवत्प्रीतिवर्द्धनः। तेजसाग्नि
समोभक्त्यानारदःशिवकृष्णयोः॥ रूपेणमदनः
साक्षात्प्रतापेभानुसन्निभः शास्त्रार्थवक्तासांगि
रसौजामदग्न्यःप्रतिज्ञया सिंहासनोभैरवःसाक्षा
द्गांगेयमलनाशनः अन्यथावाकुतोकेनकिंवा
तेनवरानने नतस्यदुरितंकिंचिन्महाकालीं

9

स्मरेद्विद्या शार्दूलमधीश्वरां भोगमोक्षैकदायिकां
भोगेन मोक्षमाप्नोति श्रुत्वा गुरुमुखान्नरः परां तां विद्यां।
शृणु वक्ष्यामि यया भैरवतां व्रजेत् क्रोधीशं तत आरू
ढं धूम्रभैरमलक्षतं नादबिन्दुसमायुक्तं मंत्रं सर्गे
पिदुर्लभं एकाक्षरीसमानास्ति विद्या त्रिभुवने प्रिये
महाकाली गुह्यविद्या कलिकाले च सिद्धिदा अथान्य:
त्संप्रवक्ष्यामि दक्षिणां कालिकां परां वाग्भवं बीज
मुच्चार्य कामराजं ततः परं मायाबीजं ततो भद्रेऽक्ष
रं मंत्रमीरितं कामराजं ततो कूर्चं मायाबीजमतः पर
अपरं अक्षरं प्रोक्तं पूर्वोक्तं फलदं प्रिये हालाहलं समु
च्चार्य मायाद्वयमतः परं एतन्मन्त्रवरं देवि सर्वका
मफलप्रदं एतेषां चैव मन्त्राणां फलमनन्तं शृणु प्रि
ये न कालनियमो नास्ति नारिमित्रादिदूषणं काय
क्लेशकरं नैव प्रयासो नास्य साधने दिवा वा यदि वा
रात्रौ जपः सर्वत्र शोभनः भोगमोक्षविरोधोऽत्र साध
ने नास्ति निश्चितं भोगेन लभते मोक्षं नरोऽपि विद्य·
यानया अस्या जपात् ध्यानात् लभेन्मुक्तिं चतुर्वि
धाम् नानया सदृशी विद्या नास्ति सिद्धिः सगोचरे
अथ संक्षेपतो वक्ष्ये पूजाविधिमनुत्तमं विस्तारे क
स्य वा शक्तिः को वा जानाति तत्त्वतः पूजा च त्रिविधा

प्रोक्तानित्यनैमित्तकाम्यतः तत्रैवनित्यपूजांचवक्ष्येतांच।
तिशृणुमघः भैरवोऽस्यऋषिःप्रोक्तःउष्णिक्छंदउदाहृतम्
देवतामुनिभिःप्रोक्तामहाकालीपुरातनी विनियोगस्तु
विद्यायाःपुरुषार्थचतुष्टये पंचशुद्धिविहीनेनयत्कृतं
नचतत्कृतम् पंचशुद्धिंविनापूजाअभिचारायकल्प्य।
ते आत्मशुद्धिःस्थानशुद्धिर्द्रव्यस्यशोधनंतथा मंत्रशु
द्धिर्देवशुद्धिःपंचशुद्धिरितीरिता भूप्रदेशेसमेशुद्धिःपु
ष्पःप्रकरसंकुले आसनंकल्पयेदादौकोमलंकंवलं
त्ववा वामेगुरून्नुगुननत्वादक्षिणेगणपतिंविभुम्
भूतशुद्धिंतथाकुर्यात्पूजायोग्योयथाभवेत् प्राणा
यामादिविधिवत्ऋष्यादिन्यासमाचरेत् आदौशुद्धिभै
रवायऋषयेनमःशिरसि उष्णिक्छन्दसेनमसामुखेवि
न्दोविनिर्दिशेत् ममप्रियेमहाकालीदेवतायैनमोहृ
दि ह्रींबीजायनमःएंब्रंक्रूंशक्तयेनमोपादयो कवित्वार्थे
विनियोगइतिविन्यस्यवांछया केवलांमातृकांन्यस्यवी
जन्यासंसमाचरेत् ॐक्रांअंगुष्ठयोर्न्यस्यॐक्रींतर्जन्योर्न
मः ॐक्रूंमध्यमयोर्न्यस्यॐक्रैंअनामिकाद्वयोः ॐक्रौं
कनिष्ठायुगलेॐक्रः करतलेतथा पुनर्हृदयादिष्वेतैर्जा
तियुक्तैःषडंगकम् षड्दीर्घभाक्स्वबीजैःप्रणवाद्यैस्तु
विन्यसेत् वर्णन्यासंतथाकुर्यात्येनदेवीमयोभवेत् अ

कं मा आइईउऊऋॠऌॡ चहृदये न्यसेत् एऐओऔअंअः कख
तं गघङ दक्षिणे भुजे ङ चछजझञ टठडढ वै वामके
१ भुजे णतथदधन पफबभ दक्षजंघके न्यसेत् मय
रलव शषसहळक्ष वामजंघके पंचधा समथा वा
पि मूलविद्यां समुच्चरन् शिरआदि च पादांतं न्यसेत्स्था
पकमुत्तमम् नित्यमाचरइति प्रोक्तः सर्वपापक्षयावहः
अथ ध्यानं प्रवक्ष्यामि भैरवाकारदायकम् हिमालय
गिरेर्मध्ये नगरे भैरवस्य च दिव्यस्थाने महापीठमणि
मण्डपराजिते नारदाद्यैर्मुनिश्रेष्ठैः संसेवितपदांबुजे
तत्र ध्याये महाकालीमाद्यां भैरववन्दितां नीलेन्दीव
रवर्णिनीं युग्मापीनतुंगस्तनीम् स्मसश्रीहरिपीठस्था
जितवतीं भीमां त्रिनेत्रां शिवाम् मुण्डखड्गकरां व
राभययुतां चित्रांवरोद्दीपनीम् वन्दे चंचलचन्द्र
कांतमणिभिर्मालां दधानां पराम् कर्णालंबितवा
णयुग्मलसितां मुण्डावलीमण्डिताम् वामाधोर्ध्व
करांबुजे नरशिरः खड्गं च सव्येतरे दानाभीतिवि
मुक्तकेशनिचयां ध्येया सदा कालिका अपरं च प्रव
क्ष्यामि ध्यानं परमदुर्लभम् कालीं करालवदनां घोर
दंष्ट्रां त्रिलोचनाम् स्मेरवक्त्रकरश्रेणीकृतकांचीं दिगं
बराम् वीरासनसमासीनां महाकालोपरिस्थिताम्

क्तिमूलसमाकीर्णसृक्कणीघोरनादिनीं मुण्ड
मालागलद्रक्तचर्चितां पीवरस्तनीं मदिरामोदितां।
स्फालकंपिताखिलमेदिनीं वामे खड्गं छिन्नमु
ण्डधारिणीं दक्षिणे करे वराभययुतां घोरवदनां
लोलजिह्विकां शकुन्तपक्षसंयुक्तवाणकर्णवि
भूषितां शिवाभिर्घोररावाभिः सेवितां प्रलयोदितां
चण्डहासचण्डनादचण्डाख्यानैश्च भैरवैः गृहीता
नरकंकालजयधारूपरायणैः सेवितां विलासि
ह्रौचैर्मुनिभिः सेवितां परां यथामन्यतमं ध्यानं
कृत्वा च साधकोत्तमः मानसैरुपचारैश्च सोऽहं मा.
त्मानमर्चयेत् ततो देवीं समभ्यर्च्य अर्घ्यं हृदयं निवे
दयेत् दशोपचारपक्षे षोडश पूजां समाचरेत् त
त्रावाह्य महादेवीं नियमेन समाहितः ततो ध्याये
न्महादेवीं कालिकां कुलभूषणां महाकालं यजे
त्ततस्तत्पीठशक्तिं ततो यजेत् कालीं कपालिनीं
कुल्लां कुरुकुल्लां विरोधिनीं विप्रचित्तां तथा चैव व
ह्निः षट्कोणके पुनः उग्रामुग्रप्रभां दीप्तां तत्र त्रिको
णके पुनः नीलां घनां वलाकां च तथा परत्रिकोण
के मात्रां मुद्रां नित्यां चैव तथैवांतस्त्रिकोणके शा
ह्वी श्यामाश्चासिकरा मुण्डमालाविभूषणा तजे.

कं.मा. नीवामहस्तेनयथार्थयतीशुचिस्मिता ब्राह्म्याद्यास्तथा
तं. वामेयजेत्पूर्वदलक्रमात् ब्राह्मीनारायणीचैवत
११ थैवचमहेश्वरी चामुण्डापिचकौमारीतथाचैवा
पराजिता वाराहीचतथापूज्यानारसिंहीतथैवच
अनुलेपनकंगन्धंधूपदीपौचपानकं त्रिभिःपू
जाचकर्तव्यासर्वासामपिसाधकैः पुनर्गन्धादिभिः
पूज्यजपादिशेषंसमर्पयेत् समर्पंचार्चयेत्देव्यायो
गिनीयोगिभिःसह मधुमांसंतथामत्स्यंयत्किं
चित्कुलसाधनं शक्त्यैदत्वाततःपश्चात्गुरवेवि
निवेदयेत् तदनुज्ञांमूर्ध्निकृत्वाशेषंचात्मनियोज
येत् मधुमांसंविनायस्तुकुलपूजांसमाचरेत् ज
न्मांतरसहस्रस्यसुकृतिस्तस्यनश्यति तस्मात्स
र्वप्रयत्नेनमकारपंचकैर्यजेत् मधुनानविनामां
सेनमंत्रेनविनामधु परस्परविरोधेनकथंसिध्यंति
साधकाः कुण्डकुम्भकपालादिपदार्थानांनिषेवनं
सौरंतंत्रेविकृतंचशैवेशाक्तेमहाफलं ब्रह्माण्ड
खण्डसम्भूतमशेषरत्नसंभवं श्वेतंपीतंसुगन्धिंच
निर्मलंभूरितेजसं अथवाकुम्भमध्येस्मिन्सर्वंत
परमामृतं अतलंयावदूर्ध्वमध्येत्रिकोणोदरवर्ति
नि तद्वांच स्फटिकोदारमणिचन्द्रचमण्डलं तेना

एतेन तद्धासि चिन्तयेत् परमामृतं श्रीरं मत्स्यरूपिणः
प्रौढस्य दन्तेरुमासः पुनः पश्चिफलासवान् योगी
स्वर्गं पीवमयोयतः सर्वशोषेच देवेशि सामान्यार्घ्य
पदे पयेत् विशेषार्घ्यं शिरे दत्वा देव्याः प्रियतमो भ
वेत् स्रांगक्रियापदे दत्वा सामान्यार्घ्यं शिरे भवेत्
३ सुक्राम्सपरामर्षीशक्तितोषणकारकः भोगे
न लभते मोक्षं ऊर्नाजल्पितेन किं नियमः पुरुषे
ज्ञेयो न योषित्सु कदाचन यद्धा तद्धा येन केन।
सर्वदा सर्वतोपि च योषितां ध्यानयोगेन पुरु
षेर्षं न संशयः बालां वा यौवनोन्मत्तां वृद्धां वापु
वतीं तथा कुत्सितां वा महादुष्टां नमस्कृत्य वि
सर्जयेत् तासां प्रहारो निन्दा च कौटिल्यमप्रियं
तथा सर्वथा न च कर्त्तव्यमन्यथा सिद्धिरोधकृ
त् इति ते कथितं शोधमाचरेत् लक्षणं प्रिये नि
त्यपूजाक्रमं भक्त्या ज्ञात्वा सिद्धिमवाप्नुयात् इति
दक्षिणाम्नाये कंकालमालिनीतन्त्रे सार्द्धलक्षग्र
न्थे महाकालीपूजाकथनं नाम चतुर्थः पटलः ४
श्रीपार्वत्युवाच कथयस्व महाभाग परमेश्वर
श्रुतं मे कस्मिन् काले च कर्त्तव्यं कलौ सिद्धिदम
द्भुतं श्रीईश्वर उवाच सामान्यतः प्रवक्ष्यामि पु

कं.मा. रश्चर्य्याविधिंप्रिये नाशुभोविद्यतेकालो नाशुभो
तं. विद्यतेक्वचित् नविशेषोदिवारात्रौनसन्ध्यायांम
१२ हानिशि कालाकालंमहेशानि भ्रांतिमात्रंनसंशयः
प्रलयेमहतिप्राप्ते सर्व्वंगच्छतिब्रह्मणि तत्कालो
यमहाभीमेकोगच्छतिशुभाशुभे कालेकालेमहा
जापेभवंत्सल्पायुषोजनाः श्रुनिर्दिष्टायुषः सर्व्वेका
लाचिन्ताकथंप्रिये यत्कालंब्रह्मचिन्तायांतत्
कालंसफलंप्रिये परश्चर्य्याविधौदेविकालचि
न्तांनचाचरेत् नात्रशुद्ध्याद्यपेक्षास्तिननिषिद्धादि
दूषणम् दिक्कालनियमोनात्रस्थित्यादिनियमो
नहि नजपेत्कालनियमोनार्च्चादिष्वपिसुन्दरि स्वे
च्छाचारोत्रनियमोमहामंत्रस्यसाधने नायमर्थो
विद्यतेस्य प्रचरेत्तुष्टमानसः जंबूद्वीपेचवर्षे
चकलौभारतसंज्ञके मण्मासादपिगिरिजेजपा
त्सिद्धिर्नसंशयः यन्नोक्तंसर्ववंतंत्रेषुतदद्यकथ
यामिते शृणुष्वैकचित्तेनगिरिजेकमलेक्ष
णे कलौचभारतेवर्षेयेनसिद्धिःप्रजायते तत्
सर्व्वंकथयाम्यद्यसावधानावधारय कलिकाले
वरारोहेजपमात्रंप्रशस्यते नतिथिर्नव्रतंहोमं
स्नानंसन्ध्याप्रशस्यते परश्चर्य्याविनादेविका

मंत्रं न साधयेत् सत्ये त्रेतायुगे देवि द्वापरे स्वप्नसाधनम् क
लिकाले तु गणेशस्य सर्वं तु स्वमयं सदा सारं हि सर्वतंत्राणां
महाकालीष्ठकल्पते प्रातः कृत्यादिकं कृत्वा ततः स्नानं स
माचरेत् कृत्वा सन्ध्यातर्पणं च संक्षेपेण वरानने पूजां चै
व वरारोहे यस्य यत् पटलक्रमात् पूजाद्वारे च विन्यस्य व
लिं दद्यात् यथाक्रमम् प्राणायामत्रयं चैव माधमक्रवलि
तथा संकल्प्योपास्य देवेशि वलिदानस्य साधकः आदौ
गणपतिर्वीजं गमित्येकारविंदुः भूमौ विलिख्य गुमेन
वलिं पिण्डोपमं ततः ॐ गं गणपतये स्वाहा इति मंत्रेण।
साधकः वलिमित्यं च सर्वत्र वीजोपरि प्रदापयेत् ॐ भैर
वाय ततः स्वाहा भैरवाय वलिन्ततः ॐ क्षं क्षेत्रपालाय स्वा
हा क्षेत्रपालवलिं ततः ॐ यां योगिनीभ्यो नमः स्वाहा च यो
गिनी वलिम् संपूर्णविधिना दद्यात् पूर्ववत् क्रमतो वलिं
कथोपकथनं देवि सृजेदत्र सुरालये पूर्वे गणपते मंत्रे तु
त्तरे भैरवाय च पश्चिमे क्षेत्रपालाय योगिन्यै दक्षिणे ददेत्
इन्द्रादिभ्यो वलिं दद्यात् आत्मकल्याणहेतवे तदा सिद्धिम
वाप्नोति वान्यथा हास्यकेवलम् पलैकं माषकल्कं च पल
मेकं च तण्डुलम् अर्द्धतोलं घृतं चैव दधि मर्द्धतोलकम्
शर्कैरेकतोलकेन वलिं दद्यात् सुसिद्धये एतेषां सद्यो
गेन वलिर्भवति शांभवि पूजास्याने तथा भद्रे कूर्मवीजं।

कंमा· लिखेत्ततः चन्द्रबिन्दुमयं बीजं कूर्म्मबीजं त्वितीरितम् स्था
तं· पयेदासनं तत्र पूजयेत्पटलक्रमात् भूतशुद्धिं ततः कृत्वा
८३ प्राणायामं ततः परम् अंगन्यासं करन्यासं मातृकान्यासमे
व च यः कुर्य्यान्मातृकान्यासमशिवो नात्र संशयः ततस्
तु भस्मतिलकं रुद्राक्षं धारयेत्ततः रुद्राक्षस्य च माहात्म्यं
भस्मनश्च महत्प्रिये आग्नेयमुच्यते भस्म उग्यगोमयसंभवं
शोधयेन्मूलमंत्रेण अष्टोत्तरशतं जपन् शिरोदेशे लला
टे च स्कन्धयोर्भुजप्रदेशके वाह्वोः पार्श्वहृदये देवि कण्ठदेशे
हृदि प्रिये श्रुतियुग्मे पृष्ठदेशे नाभौ तुण्डे महेश्वरि कूर्परा
द्वा कूर्पर्यन्तं कण्ठे ग्रीवासु पार्वति सर्वांगे लेपयेत्देवि कि
मन्यत्कथयामि ते मध्यमानामिकांगुल्यंगुष्ठेन तिल
कं ततः तिलकं त्रिरेखास्यात् रेखानां नवधा मतः पृ
थिव्यग्निस्तथा शक्तिः क्रियाशक्तिर्महेश्वरः देवः प्रथमरे
खायां भस्मनाते परिकीर्त्तितः नभस्सोऽसौ वसुभगो द्वितीया
यैव देवता परमात्मा शिवो देवस्तृतीयायाश्च देवता प
तान्नित्यं नमस्कृत्य त्रिपुण्ड्रं धारयेत्यदि महेश्वरव्रतमिदं
कृत्वा सिद्धीश्वरो भवेत् ब्रह्मचारी गृहस्थो वा वनस्थो वा
यतिस्तथा महापातकसंघातैर्मुच्यते सर्वपातकात् त
थान्यत्र विट्शूद्रस्त्रीहत्यादि उपपातकैः वीरब्रह्मण
हत्याभ्यां मुच्यते सुभगेश्वरि अंमंत्रेणापि यः कुर्य्यात्तदा

स्वाचमहिमोन्नतिं त्रिपुण्ड्रभाललतिलकोमुच्यतेसर्वपात
कैः परद्रव्यापहरणंपरदाराभिमर्षणं परनिन्दापरक्षेत्र
हरणंपरपीडनम् असत्यवाक्यपैशुन्यपारुष्यंदेवविक्रयं
कूटसाक्ष्यंव्रतत्यागंकैतवंनीचसेवनम् गोमृगाणांहिर
ण्यस्यतिलकंबलवाससाम् अन्नधान्यकुशादीनांनीचेः
भ्योपिपरिग्रहम् दासीवेश्यासुकल्पसुवृषलीसुनटीसु
च रजस्वलासुकन्यासुविधवासुचसंगमे मांसचर्म
रसादीनांलवणस्यचविक्रयम् एवंरूपाण्यसंख्यानि
पापानिविविधानिच सद्यएवविनश्यन्तित्रिपुण्ड्रस्यच
धारणात् शिवद्रव्यापहरणात्शिवनिन्दांचकुत्रचित्
निन्दायाःशिवभक्तानांप्रायश्चित्तैर्नशुद्ध्यति त्रिपुण्ड्रं
शिरसाधृत्वातत्क्षणादेविशुद्ध्यति देवद्रव्यापहरणेब्र
ह्मस्वहरणेनच कुलान्यग्रयएवात्रविनश्यन्तिसदाशि
वे महादेविमहाभागेब्राह्मणानिक्रमेणच कुलरक्षा
भवत्यस्मात्त्रिपुण्ड्रस्यचसेवनात् रुद्राक्षंयस्यदेहेषुल
लाटेषुत्रिपुण्ड्रकम् यदिस्यात्सचचाण्डालःसर्ववर्णो
त्तमोत्तमः यानितीर्थानिलोकेस्मिन्गंगाद्याःसरितश्चयाः
स्नातोभवतिसर्वत्रयल्लालाटेत्रिपुण्ड्रकम् सप्तकोटिम
हामंत्राउपमंत्रास्तथैवच श्रीविष्णोःकोटिमंत्राश्चकोटि
मंत्राःशिवस्यच तेसर्वेतेनजप्ताश्चयोविभर्तित्रिपुण्ड्रकं

कं॰मा॰ सहस्रपूर्वजातानां सहस्रं च जनिष्यताम् स्ववंशजातान्मनुजा
तं॰ नाउद्धरेत् यस्त्विष्टएरकृत् षडैश्वर्यगुणोपेतः प्राप्य दिव्यवपु
१४ स्ततः दिव्यविमानमारुह्य दिव्यस्त्रीशतसेवितः विद्याधरा
णां सिद्धानां गन्धर्वाणां महौजसाम् इन्द्रादिलोकपालानां लो
केषु च यथाक्रमम् भुक्त्वा भोगान् सुविपुलं प्रदेशानां पुरेषु
च ब्रह्मणः पद्मासाद्य तत्र कल्पायुतं वसेत् विष्णुलोके च
रमते आब्रह्मणः शतायुषम् शिवलोकं ततः प्राप्य रमते-
कालमक्षयम् शिवसायुज्यमाप्नोति न स भूयोऽपि जायते
शैवे विष्णौ च सौरे च गाणपत्येषु पार्वति शाक्तिरूपं च या।
गोः स्यात् तस्माद्गोमयसंभवम् भस्म तेषु महेशानि विशि
ष्टं परिकीर्त्तितम् शैवेऽपि च वरारोहे सागुणं वरवर्णिनि ।
शाक्ते प्रशस्तमाहेन्द्रि भस्म योवनजीवने अग्निहोत्रगोकरी
षेण भस्म शाक्त्यादिकेष्वपि सामान्यमेतत् सुश्रोणि विशेष
शृणु मत्प्रिये करीषभस्मादनघे होमभस्म महाफलम्
होमभस्मात् कोटिगुणं विष्णुयागं महेश्वरि शिवहोमं त
द्विगुणं भस्मात् शृणु सुन्दरि श्रीयष्टदेवताहोममनन्तं प्रि
यवादिनि तन्माहात्म्यमहं वक्तुं वक्त्रकोटिशतैरपि न स
मर्थो योगमार्गे किमन्यत् कथयामि ते होमः कलियुगे दे-
विं जन्तुद्वीपस्य वर्षके भारताख्ये महाकालिदर्शांशं क्रमतः
शिवे नास्ति कालेऽस्मिन् महामोहे केवलं होममाचरेत् तदेवा

ऽयुतं वापि सहस्रं वा वरानने अष्टाधिकशतं वापि काम्य
होमं प्रकल्पयेत् नित्यहोममेवं कर्त्तव्यं शक्त्या च परमेश्वरि
प्रजपेन्नित्यपूजायामष्टोत्तरसहस्रकम् अष्टोत्तरशतं वा
पि अष्टपंचाशतं चरेत् अष्टत्रिंशत्संख्यकं वा अष्टाविंशति
मेव च अष्टादश द्वादशं च दश अष्टौ च विधानतः एवं सर्वा
न्देवेशि नित्यकर्मसमाहितः सदा होमं चैव महेशानि पत
त्संख्याविधानतः इत्थं प्रकारं यत्भस्म अंगे संलिप्य सा
धकः मालां चैव महेशानि नराः प्रभुतपूजितम् गलेद
ध्याद्वरारोहे शक्रश्रीत्दिव्यनासिके रुद्राक्षमाल्यसंयो
र्ज्यं ततः शृणु मम प्रिये एवं कृत्वा तथा सार्द्धं पितृभूमौ
स्थितं मया शुभगे शृणु तत्र श्रोणि रुद्राक्षं परमं पदम् स
र्वपापक्षयकरं रुद्राक्षं ब्रह्मणीश्वरि अभुक्तो वापि भुक्तो
वा नीचानीचतरोपि वा रुद्राक्षं धारयेत् यस्तु मुच्यते सर्व
पातकात् रुद्राक्षधारणं पुण्यं कैवल्यसदृशं भवेत् महा
व्रतमिदं पुण्यं त्रिकोटितीर्थसंयुतम् सहस्रं धारयेत् य
स्तु रुद्राक्षाणां शुचिस्मिते तं नमंति सुराः सर्वे यथा रुद्र
स्तथैव सः अभावे तु सहस्रस्य बाह्वोः षोडश षोडश प
कं शिखायां कवचयोर्द्वादश द्वादश क्रमात् द्वात्रिंशत्क
ण्ठदेशे तु चत्वारिंशत् शिरे तथा उभयोः कर्णयोः षट् षट्
हृदि अष्टोत्तरं शतम् यो धारयति रुद्राक्षान् रुद्रवत् स च पू

कं॰मा॰ जितः मुक्ताप्रवालस्फटिकैः सूर्येन्दुमणिकाञ्चनैः समे
तं॰ तान्धारयेत् यस्तु रुद्राक्षान् शिवपदमसः केवलानपि रुद्रा
१९ क्षान्यो विभर्ति वरानने तं न स्पृशन्ति पापानि तिमिराणीव
भास्करः रुद्राक्षमालया जप्तो मन्त्रोऽनन्तफलप्रदः रुद्राक्षेण
जपं चैव तावन्मात्रफलप्रदः यस्याङ्गे नास्ति रुद्राक्षं एको
पि वरवर्णिनि तस्य जन्म निरर्थं स्यात् त्रिपुण्ड्ररहितं यथा
रुद्राक्षं मस्तके बद्धा शिरःस्नानं करोति यः गङ्गास्नानफलं त
स्य जायते नात्र संशयः रुद्राक्षं पूजयेत् यस्तु विना तोयाभि
षेचनैः यत्फलं शिवपूजायां तदेवाप्नोति निश्चितम् पं
कवक्त्रैः पंचवक्त्रैश्च यो दशामुखैस्तथा वलर्दशामुखैर्जस्य
सर्वसिद्धिः प्रजायते किं बहूक्त्या वरारोहे कृत्वा गतिकमुत्त
मम् रुद्राक्षं यत्नतो धृत्वा शिवपदमससाधकः भस्मनाति
लकं कृत्वा पश्चात् रुद्राक्षधारणम् प्राणायामं ततः कृत्वा सं
कल्पेनास्य साधकः मूलमन्त्रसिद्धिकामः कुर्याद्वर्णपूज
नम् षट्त्रिंशत्वर्णमालाढ्यो विस्तारोन्नतिशालिनि विलि
ख्य वन्द्ने शुद्धं सर्ववर्णात्मके घटे सर्वावयवसंयुक्तान्विलि
ख्य मातृकाक्षरान् गुरुं संपूज्य विधिवत् घटस्थापनमाचरेत्
पंचाशन्मातृकावर्णान् पूजयेत् विभवक्रमात् पंचोपचारैः
संपूज्य ध्यानं कृत्वा प्रसन्नधीः शुक्लविद्युत्प्रतीकाशां द्विभु
जां लोललोचनाम् कृष्णाम्बरपरीधानां शुक्लवस्त्रोत्तरीय

नीम् नानाभरणभूषाढ्यां सिन्दूरतिलकोज्ज्वलाम् कटा
क्षविशिखोद्दीप्तमंग्रजनाञ्चितलोचनाम् मंत्रसिद्धिप्रदां
नित्यां ध्यायेत्सत्त्वस्वरूपिणीम् रक्तविद्युत्प्रतीकाशां
कृष्णवस्त्रोत्तरीयनीम् नानाभरणभूषाढ्यां सिन्दूरतिल
कोज्ज्वलाम् कटाक्षविशिखोद्दीप्तमंग्रजनाञ्चितलोचनाम्
मंत्रसिद्धिप्रदां नित्यां ध्यायेत्रजःस्वरूपिणीम् श्यामतन्वं
मरसंकाशां द्विभुजां लोललोचनाम् रक्तवस्त्रपरीधानां
कृष्णवस्त्रोत्तरीयनीम् नानाभरणभूषाढ्यां सिन्दूर॰
तिलकोज्ज्वलाम् कटाक्षविशिखोद्दीप्तमङ्गुलतापरिमेव॰
नाम् मंत्रसिद्धिप्रदां नित्यां ध्यायेत्तमःस्वरूपिणीम् ध्या
त्वा पाद्यादिकं दत्वा त्रिगुणां पूजयेत्क्रमात् ॐ शृंगारस्व
रूपिण्यै नमः पाद्यैः प्रपूजयेत् आदिध्यानेन सभगोयजे
त्सत्त्वमयीपराम् ॐ कंकाररूपिण्यै नमः पाद्यादिभिर्य
जेत् क्रमात्सप्तदशार्णाहि द्वितीयंध्यानमाचरन् ॐ दं॰
काररूपिण्यै नमः पाद्यादिभिर्यजेत् क्रमात्सप्तदशार्णे
द्वितीयंध्यानमाचरन् एवंक्रमेण पंचाशत्वर्णाद्विय
रिपूजयेत् इति ते कथितं भद्रे पंचाशद्वर्णपूजनम् वर्णा
नां पूजनात्भद्रे देवपूजाप्रजायते अणिमाद्यष्टसिद्धी॰
नांपूजास्यात्वर्णपूजनात् सप्तकोटिमहाविद्या उपविद्या
तथैवच श्रीविष्णोःकोटिमंत्रब्रह्मकोटिमंत्रःशिवस्यच ए॰

कुं॰म॰ जन्मान्तरूजितं सर्व वर्णानां सिद्धिदायिकम् प्रथमं प्रणवं
तं॰ दत्वा सहस्रं कुण्डलीमुखे मूलविद्यां ततो मन्त्रं सहस्रं युग
१८ लं जपेत् ततस्तु मस्तके मातर्जपेच्च दीपनीं पराम् आदौ
गायत्रीमुच्चार्य मूलमन्त्रं ततः परम् प्रणवं च ततो भीम
त्र्यक्षाणां सहयोगतः सदेवानां महेशानि दीपिनी परिकी
र्तिता पुनामपि सहस्रं च प्रजपेत् कुण्डलीमुखे प्रणवा
दौ जपेद्विद्यां गायत्र्यादीपनीं पराम् गायत्री प्रणवं वदा
मि ॐ ॐ मं मं ॐ मे प्रिये षट्शतमिदं मन्त्रं गायत्री सम्पु
टीकृतम् अस्यास्य फलमाप्नोति नैव देव वरवर्णिनि स्म
रणं कुण्डलीमध्ये मनसा उन्मनी सह सहस्रारे कर्णि
कायां चन्द्रमण्डलमध्यगाम् सर्वसंकल्परहिता कला
सप्तदशी भवेत् उन्मनी नाम तस्या हि भवपाशनिकृन्त
नी उन्मन्या सहितो योगी न योगी उन्मनीं विना वृद्धिं
कुर्यात् सर्वकार्यं उन्मनीकुसुमान्विताम् उन्मनीं च मनोव
र्णी स्मरणात् सिद्धिदायिनीम् स्मरते कुण्डलीयोगाद
मन्त्रं करोति वशं उन्मनीकुसुमं तत्तु ज्ञेयं परमदुर्ल
भम् हंसं नित्यमनन्तं मध्यमगुणं स्वाधारतो निर्गता
शक्तिः कुण्डलिनी समस्तजननी हस्ते गृहीत्वा च तम्
यान्ती स्वाश्रममर्ककोटिरुचिरा तन्नामामृतोल्लासिनी
देवीं तां गमनागमैः स्थिरमतिर्ध्यायेत् जगन्मोहिनीम्

इतितेकथितंध्यानंमंत्रस्यजपनामयम् विनामनोक्तमनो
मंत्रविनाध्यानंजपंवृथा ततःसंकल्प्यध्यात्वैवमूलमंत्र
ण्यसिद्धये गायत्रीमयुतंजप्त्वातदंष्टंप्रणवंजपेत् दीपनं:
प्रणवस्याष्टंजपेत्पंचदिनावधि शूद्राणांप्रणवंदेविचत
ईशस्वरंप्रिये नादबिन्दुसमायुक्तंस्त्रीणांचैववरानने म
नोस्वाहाचयादेवीशूद्रोच्चार्यानसंशयः होमकार्यमदे
शानिशूद्रःस्वाहांनचोच्चरेत् मंत्रेषुहोनास्तिशूद्रविषवी
जेविनाप्रिये गणपस्यादौयत्नदत्तंबलिदानंदिनेदिने तेने
ववलिनाभेदेहविघ्नसमन्वितंसदा शोषरंष्टंप्रपूज्याथस्वा
विघ्नाशीस्त्रियासह जापकस्यचयन्मंत्रमेकवर्णंततः
प्रिये तस्यपत्नीशक्तिरूपाप्रत्यहंप्रजपेत्यदि तदाफल
मवाप्नोतिसाधकःशक्तिसंगतः शक्तिहीनेभवेद्दुःखंको
टिपुरश्चरणेनकिम् साधकाचहविघ्नाशीसाधिकाप्र
विघ्नवर्जिता यथेच्छाभोजनंतस्यास्तांबूलपूरितानना
नाभरणवेशाद्याधूपामोदनमोदिता शिवहीनातथाना
रीहरेनापरिवर्जयेत् श्रीदेव्युवाच गायत्रीजपकालेतुसा
धिकाकिंजपेत्प्रभो श्रीशिवउवाच गायत्रीमंत्रजपविधौ
प्रजपेत्यदिसाधिका पूर्वोक्तेनविधानेनध्यात्वाकृत्वा
वहजनम् मानसंपरमेशानिजपेत्सद्गुतमानसा ततःक्ष
दिनंप्राप्यप्रातःस्नानंसमाचरेत् कुंकुमागुरुपंकेनकस्तूरी

कुं॰मा॰ चन्दनेनच कुङ्कुमबीजं लिखेत्तमद्देश्वपत्रकाष्ठेन तच्चन्दनैः त
तं॰ त्रासनं समास्थाय विशेत्साधकसन्निधौ एवं विधाय सा॰
१० साध्वी साधकोपि प्रसन्नधीः संकल्प्य विधिना मन्त्री मूलमं
त्रस्य सिद्धये लक्षं जपेत्परस्पर्य्या विधौ विधिविधानतः त
द्विधानं वदामि शृणु त्वामवधारय ॐ ॐ कं कुं मं सं देवि श्रा॰
नः स्नानोत्तरं परम् दशधा प्रजपेन्मंत्रं जिह्वाशोधनकारकं
ततश्च प्रजपेन्मंत्रं मौनी मध्यन्दिनावधि तस्या वामे तस्याप
त्नी तस्याप कान्तरं जपेत् साधकः शिवरूपश्च साधिका शि
वारूपिणी अन्योन्यचिन्तनाद्देवि देवत्वं जायते ध्रुवम् श्रा
द्धं वै तेच प्रणवं दत्वा मंत्रं जपेत्सुधीः दशधा वामसन्दशं॰
जप्त्वा मंत्रं जपेत्तथा प्रातःकालं समारभ्य जपेन्मध्यन्दि
नावधि एवं दिप्रसहं कुर्य्यात्तथावल्लक्षं समाप्यते द्वितीय
प्रहरार्द्धे नित्यपूजादिकं चरेत् स्नानं कृत्वा ततो धीमान्नह
विष्यं भुञ्जेत ततः तत्पत्नी शक्तिरूपा च पातिव्रत्यपराय
णा तस्यां चेच्छा भवेत्येषु भुञ्जे पानमभिषिना दशादण्ड।
गते रात्रौ प्रातर्यावत्प्रजपेन्मनुम् तांबूलपूरितमुखो ऽप्यथा॰
मोदनमोदितः वामे श्री शक्तिरूपा च जपेत्साधकान्तरम्
दक्षिणे साधकः सिद्धो दिवा मानेन जपेन्मनुम् श्राद्धं तर्पणं
कृत्वा प्रसहं प्रजपेत्यदि ततः सिद्धिमवाप्नोति प्रकाश्यश्चानि
रेवच मातृकापुटितं कृत्वा चन्द्रविन्दुसमन्वितम् प्रत्यहं प्र

जपेन्मंत्रमनुलोमंतुविलोमतः जपादौस्तुभगेप्रोक्तः
प्रत्यहंप्रजपेन्मन्त्रम् तेनदेहस्तुभगेमातःपुरश्चरणमी
रितम् समाप्तेपुरश्चरणेगुरुदेवंप्रपूजयेत् तदासिद्धो
भवेन्मन्त्रोगुरुदेवस्यपूजनात् जम्बूद्वीपस्यवर्षेचकलि
कालेचभारते दृष्टादृष्टंवर्जयेत्भद्रेनास्तिहोमःकदा
चन दृष्टादृष्टक्रमतोदेविपंचांगविधिनाकलौ नाचरेत्
कुत्रचिन्मन्त्रीपुरश्चर्याविधिंशुभे भ्रमात्यदिमहेशा
निकारयेत्साधकोत्तमः सिद्धिहानिर्महानिर्हिजाय
तेभारतेऽनघे दृष्टादृष्टंजायतेश्रेयंगुरुदेवस्यपूजनात्
अतएवमहेशानिभक्त्यागुरुपदंयजेत् दक्षिणांगुरवेद
द्यात्स्वर्णंवाससमन्वितम् यामंतिलंतथादद्यात्धे
नुंवापिपयस्विनीम् अन्यथाविफलंसर्वंकोटिपुरश्चर
णेनकिम् कुमारीभोजनंसान्तंसर्वसिद्धिप्रदायकम्
कुमारीभोजितायेनत्रैलोक्यंतेनभोजितम् स्नानात्
दर्शनात्तस्यास्मरणात्स्पर्शनात्प्रिये सर्वसमर्पणमा
यातिसाधकोभक्तिमानसः पुरश्चरणसंपन्नोवीरसा
धनमाचरेत् यस्यानुष्ठानमात्रेणमन्दभाग्योपिसिद्ध्य
ति पुत्रदारधनस्नेहलोभमोहविवर्जितम् एवंप्रतिज्ञा
मासाद्यगुरुमाराध्ययत्नतः बलिदानादिनासर्वमान

कं॰मा॰ सैः परिपूज्य च शरत्काले महापूजा क्रियते या च वार्षिकी
तं॰ तस्मिन् पक्षे विशेषेण पुरश्चरणमाचरेत् देव्या बोधं समा
१८ रभ्य यावत् स्यात् नवमी तिथिः अयुतं च जपेन्मंत्रं सहस्रं
भक्तिभावतः होमपूजादिकं चैव यथाशक्त्या विधिं चरेत्
सप्तम्यादौ विशेषेण पूजयेदिष्टदेवताम् अष्टम्यादिनव
म्यंतमुपवासपरो भवेत् अष्टमीनवमीरात्रौ पूजां कुर्या
त् महोत्सवैः अयुतं जपादिकं कुर्यात् साधकः स्थिरमा
नसः शक्त्या सह वरारोहे कुमारीपूजनं चरेत् दशम्यां
पारणं कुर्यान् मत्स्यमांसादिभिः प्रिये एवं पुरश्क्रि
यां कृत्वा साधकः शिवतां व्रजेत् अथवान्यप्रकारेण पु
रश्चरणमुच्यते शरत्काले महादेव्या बोधने च महोत्स
वे प्रतिपत्तिथिमारभ्य नवम्यंतं मम प्रिये पूर्वोक्तविधि
ना मंत्री कुर्यात् पुरश्क्रियां धिया अथवान्यप्रकारेण
पुरश्चरणमुच्यते शरत्काले चतुर्थ्यादिनवम्यंतं सहस्रा
ष्टकम् जपित्वाष्टसहस्रं भद्रे सप्तम्यादौ प्रपूजयेत् तथा स
र्वोपचारैस्तु वस्त्रालंकारभूषणैः महिषैश्छागलैर्मेषै
स्सत्वर्गलभेन्नरः अष्टमीसन्धिवेलायां तेनैव विधिना
पशुम् छित्वा तस्योपरि स्थित्वा मध्यमंत्रं जपेत्सुधीः
निर्भीर्ध्यानपरो भूत्वा वांछितां सिद्धिमाप्नुयात् नवम्यां

18

नियतं जप्त्वा पूजयित्वा यथाविधि गुरवे दक्षिणान्दद्यात्तद
शिष्यापारयेत्ततः एवं कृत्वा पुरश्चर्यां किं न साधयति सा
धकः अथवान्यप्रकारेण पुरश्चरणमुच्यते अष्टमीं संधि
वेलायामष्टोत्तरलतागृहे प्रविश्य मंत्री विधिवत्तासां स
म्यक्पूजयेत्ततः पूर्वोक्तकल्पमासाद्य पूजादिकमथाचर
न् केवलं कामदेवोऽसौ जपेदष्टोत्तरं शतम् महासि
द्धो भवेत्सद्यो लतादर्शनपूजनात् लतागृहंस्पर्शणेप्रौ
ढिकामकौतुककलालसे अष्टौ संख्यो अतिक्रम्य नवसंख्या
दिसंख्यिकाम् यौवनादिगुणैर्युक्ताः साधिकाः कामग
र्विताः स्त्रियो यत्र गृहे संति तद्गृहं हि लतागृहम् अथ
वान्यप्रकारेण पुरश्चरणमुच्यते पूर्वोक्तानि महेशानि
हेमन्तादिगतो चरेत् साधकः पूर्णतां प्राप्य सर्वभोगेश्व
रो भवेत् अथवान्यप्रकारेण पुरश्चरणमुच्यते पूर्वोक्ता
नि महेशानि हेमन्तादिगतो चरेत् साधकः पूर्णतां प्राप्य
सर्वभोगेश्वरो भवेत् अथवान्यप्रकारेण पुरश्चरणमु
च्यते चतुर्दशीं समारभ्य यावदन्या चतुर्दशी तावज्जपे
महेशानी मंत्री वांछितमाप्नुयात् अथवान्यप्रकारेण पु
रश्चरणमुच्यते कृष्णाष्टमीं समारभ्य यावत्कृष्णाष्टमी
भवेत् सहस्रसंख्याजपेत्तत्पुरश्चरणमिष्यते यत्कृत्वा
परमेशानि सिद्धिः स्यान्नात्र संशयः अथवान्यप्रकारेण पु

कं॰ मा॰ तं॰ १९ । रणमुच्यते कृष्णचतुर्दशीं प्राप्य नवम्यन्तं महोत्सवे अष्टमी
नवमी रात्रौ पूजां कुर्य्याद्विशेषतः दशम्यां पारणं कुर्य्यान्नम
तस्यां मांसादिभिः प्रिये षट्सहस्रं जपेन्नित्यं भक्तिभावपराय
णः अथवान्यप्रकारेण पुरश्चरणमुच्यते अष्टम्यां च चतुर्द
श्यां नवम्यां वीरवन्दिते सूर्य्योदयं समारभ्य यावत्सूर्य्योद
यो भवेत् तावज्जपेन्निरातंकः सर्व्वसिद्धीश्वरो भवेत् अथवा
न्यप्रकारेण पुरश्चरणमुच्यते अष्टम्यां च चतुर्द्दश्यां पक्षयो
रुभयोरपि अस्तमारभ्य सूर्य्यस्य यावत्सूर्य्यास्तमं भवेत्
तावज्जपेन्निरातंकः सर्व्वसिद्धीश्वरो भवेत् अथवा निर्ज्जन
स्थस्य अस्थिपणाध्यासनेन च उदयास्तं दिवा जप्त्वा सर्व्वसिद्धी
श्वरो भवेत् तेनासनेन वा देवि अस्तमारभ्य भास्वतः जपि
त्वा चास्तपर्य्यन्तं साधकः सिद्धिमाप्नुयात् जपान्ते पूजयित्वा
वगुरवे दक्षिणां ददेत् अथवान्यप्रकारेण पुरश्चरणमुच्यते
सूर्य्योदयं समारभ्य घटिकाच्च दशकक्रमात् ऋतवः स्युर्व्वसं
ताद्या अहोरात्रं दिने दिने वसन्तो ग्रीष्मवर्षा च शरद्धेमन्तशि
शिराः वसन्तश्चैव पूर्व्वाह्णे ग्रीष्मो मध्यन्दिने तथा अपरा
ह्णे प्रावृषः स्युः प्रदोषे शारदः स्मृताः अर्द्धरात्रे तु हेमन्तः शेष
श्च शिशिरः स्मृतः सूर्य्योदयं समारभ्य वसन्तान्तं समाहितः
तावज्जपेन्महेशानि पुरश्चर्य्याहि सिध्यति ततः पूजादिकं कृ
त्वा शक्तियुक्तस्य साधकः हारयेद्ब्राह्मणान्दत्वा सर्व्वसिद्धीश्व

रोभवेत् अथवान्यप्रकारेणपुरश्चरणमुच्यते ग्रीष्मादि
षुमद्देशानिपंचसर्व्वत्रसाधकः पृथग्जप्त्वावरारोहे पु
रश्चर्य्याहि सिध्यति पूर्वोक्तविधिनासर्व्वंकर्त्तव्यंवीरव
दिते अतोजप्त्वानमन्त्रेणशक्तितः पूजयेत्पराम् एव
माचर्य्यकृत्स्नंवैयनानामीश्वरोभवेत् अथवान्यप्रकारे
णपुरश्चरणमुच्यते कुमारीपूजनादेवपुरश्चर्य्याविधिः
स्ततः गुरुमानीयसंस्थाप्यदेववत्पूजयेद्विभुम् व
स्त्रालंकारभूषाद्यैःसर्व्वसन्तोषयेद्गुरुम् ततस्ततः
ततस्सुतंवापितत्पत्नींचविशेषतः पूजयित्वामन्त्रं
जप्त्वासर्व्वसिद्धीश्वरोभवेत् गुरुसन्तोषमात्रेणतुष्टा
मंत्रोऽपिसिद्ध्यति मासिमासिचमंत्रस्यसंस्कारान्द
शायाचरेत् एवंक्रमविधानेनकृत्वानित्यंहिसाधकः
षण्मासाभ्यन्तरेवापिएकवर्षान्तरेऽपिवा साधनैःसु
भगेभद्रेयदिसिद्धिर्न्नजायते उपायास्तत्रकर्त्तव्यास्सप्त
मेतंमतंस्मृतम् भ्रान्तिर्बीरत्नभूषादिलाभःसुचिरजीवि
ता नृपाणांतत्कुलानांचवातस्सल्पलोकवश्यता म
हदैश्वर्य्याणिसंचपुत्रपौत्रादिसंपदः अथमासिसिद्धियोभ
द्रेषण्मासाभ्यन्तरेयदि एकवर्षान्तरेवापिसंततिप्राकर
वन्दिते साधकाश्चतदासिद्धानात्रकार्य्याविचारणा अ
शेषोपायान्प्रवक्ष्यामियदिसिद्धिविलंबनम् भ्रमणंवाय

कं॰मा॰ नैवशंपयीठंनैचतथाप्रिये योषणांतोषणांचैवदद्यान्नैचततः
तं॰ परम् उपायाः संतिसर्वेते कृताः त्रेतायुगेषुच द्वापरेचतथा
२ थाभेदेउपायंसततंमस्तुतम् नचशास्त्रंकलौभेदेसर्वंशाकर
भाषितं डाकिन्यादिपुटितंकृत्वालक्षंचप्रजपेन्मनुम् डाकि
नीपुटितंकृत्वालक्षंचप्रजपेन्मनुम् राकिणीपुटितंकृ॰
त्वायदिसिद्धिर्नजायते लाकिनीपुटितंकृत्वालक्षंचप्रज
पेन्मनुम् लाकिनीपुटितंकृत्वायदिसिद्धिर्नजायते का
किनीपुटितंकृत्वालक्षंचप्रजपेन्मनुम् काकिनीपुटितं
कृत्वायदिसिद्धिर्नजायते शाकिनीपुटितंकृत्वालक्षंचप्र
जपेन्मनुम् शाकिनीपुटितंकृत्वायदिसिद्धिर्नजायते हा
किनीपुटितंकृत्वाजपेल्लक्षंसमाहितः तदासिद्धोभवेन्म
न्त्रोनात्रकार्य्याविचारणा हाकिनीपुटितंकृत्वायदिसिद्धि
र्नजायते पुटितंसत्वरूपिणालक्षंचप्रजपेन्मनुम् पुटि॰
तंसत्वरूपिण्यायदिसिद्धिर्नजायते ककारादिक्षकारांता
मातृकावर्णरूपिणी तयासंपुटितंकृत्वालक्षंचप्रजपेन्म
नुम् छिन्नविद्यादयोमंत्रांतेतेतेनिरूपिताः यतेतेसिद्धि॰
x. मायांतिमातृकावर्णभावतः निश्चितंमंत्रसिद्धिःस्यान्ना
त्रकार्य्याविचारणा वर्णमयीपुटीकृत्वायदिसिद्धिर्नजा॰
यते ततोगुरुपुटीकृत्यलक्षंचसंजपेन्मनुम् गुरुदेवप्र॰
सादेनसत्वरंलासिद्धिमाप्नुयात् श्रीपार्वत्युवाच आदिदेव

महादेव आद्यंतगोपनं वद यदि नो कथ्यते देव विंमुंचामि
तदा तनुम् श्रीईश्वर उवाच आद्यंतगोपनं सम्यक्कथ्यते तत
कथयाम्यहम् जंबूद्वीपस्य वर्षेषु कलौ लोका अधमाः स्मृ
ताः गुरुभक्तिविहीनाश्च भविष्यंति गृहे गृहे उच्छिष्टाचार
ताः सर्वे परमज्ञानवर्जिताः लौकिकाचारिणः सर्वे भवि
ष्यंति गृहे गृहे विनाशाद्रूपरिज्ञानं मंत्रदाता द्विजो भवेत्
मम मंत्रः श्रीमती मंत्रः संसारोद्भवबन्धनात् कथ्यते देवदे
वेशि मंत्रः सर्वतंत्रसिद्धिदः जायते तेन मे शंका कथं मे प्रा
णवल्लभे श्रीभैरव उवाच भूतनाथ महाभाग हृदये मे।
कृपां कुरु कथ्यतां कथ्यतां देव यतस्ते सेविकावयम् श्री
ईश्वर उवाच सुभगे शृणु मे मातः कृपया कथयामि ते प्र
थमे डाकिनीवीजं युवतीषोडशाक्षरम् अं आं इं ईं उं ऊं ऋं
ॠं लृं लॄं एं ऐं ओं औं अं अः डाकिनी देवदेवेश पाईरितं वीजं।
मुत्तमम् आद्यंतपुटितं कृत्वा मंत्रलक्षं जपेद्यदि तदा सि
द्धो वरारोहे नान्यथा वचनं मम अधुना संप्रवक्ष्यामि राकि
णीवीजमद्भुतम् यकोच्चारणमात्रेण सत्यत्रेताश्रयो भवेत्
कं खं गं घं ङं चं छं जं झं ञं दशानत्या महेश्वरि इति ते कथितं
मया राकिणीवीजमुत्तमम् टं ठं डं ढं णं तं थं दं धं नं दश
कं परमेश्वरि इति ते कथितं भद्रे लाकिनीवीजनिर्णयम्
अधुना संप्रवक्ष्यामि काकिनी सिद्धिदायिनीम् पं फं वं भं मं

कं॰मा॰ यं रं लं अष्टार्णं वीरवन्दिते कथितं काकिनीबीजं चतु-
तं॰ र्वर्गफलप्रदम् अधुना संप्रवक्ष्यामि शृणु भगे एणशाकिनी
२१ म् वं शं षं सं चतुर्वर्णं वाञ्छितार्थप्रदं प्रिये इदं तु शाकिनी
बीजं चतुर्वर्गप्रदायकम् अधुना संप्रवक्ष्यामि शृणु भगे
एणहाकिनीम् हं लं क्षं हाकिनीबीजं त्रिविधसिद्धिप्रदा
यकम् अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः षोड
शार्णं महाबीजं सत्त्वमध्ये प्रकीर्तितं वज्रः स्वरूपिणी बी
जं शीघ्रसिद्धिप्रदायकम् कं खं गं घं ङं चं छं जं झं ञं टं ठं
डं ढं णं तं थं इदं सप्तदशार्णं हि रजोमध्ये प्रकीर्तितम् र
क्तं तमोमयी बीजमधुना ते वदाम्यहम् दं धं नं पं फं बं भं
मं यं रं लं वं शं षं सं हं लं क्षं इदं सप्तदशार्णं हि तमोमध्ये उ
दाहृतम् अधुना संप्रवक्ष्यामि मातृकाबीजमद्भुतम् अं
आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं
जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं
हं क्षं इदं पञ्चाशदर्णं हि मातृकायाः प्रकीर्तितम् अनुलो
मविलोमेन पुटीकृत्य जपं चरेत् लक्षं यावन्महेशानि त
तः सिद्धो न संशयः गुरुबीजं समुद्दिष्टं गुरुरित्यक्षरद्वयं
डाकिनी राकिनी देवि लाकिनी काकिनी ततः शाकिनी
हाकिनी संज्ञा सत्त्वरूपा ततः प्रिये रजोरूपा तमोरूपा मा
तृकारूपिणी गुरुः एतास्तु परमेशानि मूर्तिः पंचाशदक्षरं

डाकिनी च महादेवि अणिमासिद्धिदायिनी राकिणी लघि।
मासिद्धिदायिनी लाकिनी तथा प्राप्तिसिद्धिदायिनी च का
किनी काम्यदायिनी शाकिनी महिमासिद्धिदायिनी हाकि
नी ततः कामावशायिता सिद्धिं जपादेव प्रयच्छति सत्वरू
पा तमोरूपा रजोरूपा तथैव च एताश्चैव महादेवि चतुर्व।
र्गं वदन्ति हि पंचाशद्वर्णरूपा या यानिर्वाणं स्माद्ददाति हि गु
रुर्ददाति सकलं ब्रह्माण्डज्ञानमव्ययम् इति ते कथितं भ।
द्रे डाकिन्यादिविनिर्णयम् डाकिनी राकिनी चैव ला
किनी काकिनी तथा शाकिनी हाकिनी देवि वर्णानाम्।
त्रे देवताः गणानां सिद्धिवर्णानां षडेते ह्यधिदेवताः डाकि
न्यादेर्विना ज्ञानं वर्णं वर्णं पृथक् पृथक् अज्ञानात्प्रज।
पेन्मंत्रं डाकिन्यादेश्च भक्षणम् विना वर्णपरिज्ञानं कोटि
पुरश्चरणेन किम् तस्य सर्वं भवेद्दुःखमरण्ये रोदनं यथा
शृणु ध्यानं प्रवक्ष्यामि डाकिनीनां शुचिस्मिते ध्यानानि
यथा शरच्चन्द्रप्रतीकाशां द्विभुजां लोललोचनाम् सि
न्दूरतिलकद्दीप्तं अञ्जनांचितलोचनाम् कृष्णांबरपरी
धानां नानालंकारभूषिताम् ध्यायेच्च ऋषिमुख्यैर्निषे
डाकिनीमन्त्रसिद्धये। अरुणादित्यसंकाशां द्विभुजां लोल
गलोचनाम् सिन्दूरतिलकोद्दीप्तं अञ्जनांचितलोचनाम् ध्यायेच्च ऋषि
शुक्लांबरपरीधानां नानाभरणभूषिताम्

कं॰मा सुंदरीं निःसंशाकिणीमंत्रसिद्धये २ सिन्दूरवर्णसंकाशां
तं॰ द्विभुजां खंजननेत्रणाम् सिन्दूरतिलकोद्दीप्तसंरंजनांचि
२२ तलोचनाम् शुक्लांबरपरीधानां नानालंकारभूषितां
ध्यायेद्वशिसुंदरीं निःसंलाकिनीमंत्रसिद्धये ३ यवा-
यावकसंकाशां द्विभुजां खंजननेत्रणाम् सिन्दूरतिलो
कद्दीप्तसंरंजनांचितलोचनाम् शुक्लांबरपरीधानां नाना
भरणभूषिताम् ध्यायेद्वशिसुंदरीं निःसंकाकिनीमं
त्रसिद्धये ४ शुक्लज्योतिःप्रतीकाशां द्विभुजां मृगलोच
नाम् सिन्दूरतिलोकद्दीप्तसंरंजनांचितलोचनाम् शु
क्लांबरपरीधानां नानालंकारभूषिताम् ध्यायेद्वशि
सुंदरीं निःसंशाकिनीमंत्रसिद्धये ५ शुक्लकुसुमरुणा-
भासां द्विभुजां लोललोचनाम् भ्रमद्भ्रमरसंकाशां कु
टिलालककुन्तलाम् सिन्दूरतिलोकद्दीप्तसंरंजनांचि
तलोचनाम् रक्तवस्त्रपरीधानां शुक्लवस्त्रोत्तरीयिणी
ध्यायेद्वशीसुंदरीं निःसंहाकिनीमंत्रसिद्धये ६ त्रिगुणा
याश्च देव्याश्च ध्यानं पूर्वमुदाहृतं अधुना संप्रवक्ष्यामि-
मातृकाध्यानमुत्तमं ॐ पंचाशल्लिपिभिर्विभक्तमुख
दोःपन्मध्यवक्षःस्थलीं भास्वन्मौलिनिबद्धचन्द्रशकला
मापीनतुंगस्तनीं मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां
च हस्तांबुजैर्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतां।

माश्रये गुरोरपि महेशानि पूर्वोक्तध्यानमाचरन् पाद्यादि-
भिर्वरारोहे संपूज्य प्रजपेन्मन्त्रं पूर्वोक्तं यस्य यद्बीजं तन्मन्त्रं
तस्य निर्णयं ॐ ड्राकिन्यै नमः स्वाहा पंकाकिन्यै नमस्ततः
तत्तद्ध्यानेन इस्त्रस्वापूजयेदुपचारतः ॐकारबीजेन पुटि-
तं कृत्वा मंत्रं जपेत् यदि तदा सिद्धो भवेन्मंत्री पापादिदोष-
दुषितः इति ते कथितं देवि कलिकालस्य सम्मतं कलौ
भारतवर्षे च नान्यत्र वर्षे कदाचन श्रीमादिषोडशभाण्डारं
डाकिनीसिद्धिसंयुतं श्रीमादिदशभाण्डारं लाकिनीसि-
द्धिनिर्णयं गदादिदशभाण्डारं काकिनीसिद्धिनिर्णयं क-
ल्याण्यादिकीसंतं शाकिनीसिद्धिनिर्णयं वह्न्यादिविल-
वर्णान्तं हाकिनीसिद्धिनिर्णयं गुरुदेवं विना भद्रे निष्फ-
लं श्रमकेवलं कलिकाले वरारोहे कलहे गुरुशिष्ययोः
भविष्यति न सन्देहः प्रहारं गुरुशिष्ययोः इति ते कथितं
सर्वं कलिकायाः सुदुर्लभं कालिका भैरवो देवो जागर्ति
हि सदा कलौ तारा चैव महाविद्या तथा त्रिपुरसुन्दरी य
तथा छिन्नमस्ता च मातंगी बगलामुखी त्वरिता अन्नपू-
र्णा च तथा वाग्वादिनी प्रिये महिषघ्नी विशालाक्षी तारि-
णी भुवनेशिका धूमावती भैरवी च तथा प्रत्यंगिरादिका
दुर्गा शाकंभरी चैव कलिकाले हि निद्रिता एतासां जपमा-
त्रेण निद्राभंगो भिजायते निद्राभंगे कृते देवि सिद्धिहानिश्च

जायते किं तासां जपपूजायां हानिः स्यात्तु न रोचनम् ब्राह्मणे
क्षत्रिये वैश्ये शूद्रे विद्या प्रशस्यते सत्यादि च युगे सर्वजा
तिषु कालिका प्रशस्ता कालिका विद्या अस्याः फलबो।
धिका उपायं तत्र वक्ष्यामि येन सिद्धिः प्रजायते सहस्रं डा
किनीमंत्रं निशायां प्रजपेत् यदि बहुकालेन तदा सिद्धिर्जा
यते नात्र संशयः स्त्रीशूद्राणां पुरश्चर्या नास्ति भद्रे कदाच
न जपपूजा सदैवासां प्रशस्ता वीरवन्दिते चन्द्रसूर्यो
परागे च शूद्राणां सिद्धिरुत्तमा जायते सुभगे मातः गु
रुभक्तिर्भवेत् यदि तदा सिद्धिमवाप्नोति गुरुभक्त्या वि।
शेषतः ॥ इति श्रीदक्षिणाम्नाये श्रीकंकालमालि
नीतंत्रे पंचमपटलः समाप्तम् ॥ ॥
कंकालमालिनीतंत्रं समाप्तः ॥ ॥

